[illegible] सरितमिव मधुर [illegible] निरूपितपरमा ता काम- [illegible] पदामि [illegible] पानी कुपित इव. क [illegible] देवाङ्गनेव सुन्दरी [illegible] ननुभवन्ती प्रियतमा संयोगिता पूर्वमेव [illegible] न निवेदिता ! अस्तु. सम्प्रति वृथा कालयापनं विहाय [illegible] प्रियतमा संयोगिता [illegible] रोमाञ्चित- [illegible] प्रदर्शितेन मार्गेण [illegible] पुरमाजगाम. अचिरादेव [illegible] प्रदीपमधुरे. सर्वत्र स्थापितबृहद्दर्पणप्रतिबिंबित- [illegible] कुसुमगुच्छसहस्र [illegible] नूपुरादिजितरूपे. [illegible] संचालन- [illegible] विविधक्रीडाखगमधुरालापणरन- [illegible] अनेकविलासिजनसुन्दरप्रतिकृतिमनोरमे, दासीगणमध्यदेशविराजमानमेखलानिखातहीरककिरणव्यापृते. ताम्बूल- [illegible] पूर्णसुवर्णभाण्डसंकुले, मन्मथनिवास इव तस्या अन्तः- पुरे [illegible] मूर्तं स्वभाग्यमिव स्वाभीष्टदेवतामिवापश्यत्.

तदानीं सा संयोगिता तं रतिविरहितमेकाकिनमेव समागतं मदनं मन्यमाना लज्जया किमपि स्वागतं विधातुं नो प्राभवत् केवलमुत्थाय तिष्ठत्या. स्वसख्याः संयोगिताया मनोगतं जानन्ती सा कर्णाटकी दासी सत्वरमग्रे समुपसृत्य ' सुस्वागतं महाराजस्य पृथ्वी-

राजन्' इत्युक्त्वा तं [illegible] कानने [illegible]
संयोगितामपि [illegible]

अथ लज्जानुरोधाद्वा [illegible]
कन्यां वीक्ष्य सा दासी पुनरपि [illegible]. पृथ्वीराज ! [illegible]
चक्रवालाधिपते ! [illegible] कन्या [illegible]
नाम त्वदनुरागमया [illegible] [illegible].
च सर्वा अपि [illegible] चिन्ताव्याकुला
अभवाम [illegible] परमेश्वरकृपया त्वा समागतं वीक्ष्य [illegible] सर्वा
वयमनुगृहीता इति.

तदानीं च सा संयोगिता कोकिलकूजितानुकारिणा स्वरेण
' सखि ! युष्मदपेक्षयाऽहमेव सर्वथा महाभागिनानुगृहीताऽस्मि '
इत्यवदत्. तानि चामृतमयानीव वाक्यानि श्रवणपुटाभ्यां निपीय
सन्तुष्टान्तःकरणः प्रफुल्ललोचन आनन्दातिरेकोल्लसन्मानसः नरेन्द्र-
समाह. प्रिये! मया समागतेन न त्वमनुगृहीता नापि त्वदीया चातुर्य-
खनिरियं दासी, किंतु स्वयमात्मैवानुगृहीतः. यद्यपि चिरात्खल्वहमस्यां
त्वत्सहचर्यां बद्धानुरागस्तथापि कार्यानुरोधाद्वा कनोजाधिपकोपभयाद्वा
नागन्तुं प्राभवम्. तदर्थं क्षमादानेनायं दासोऽनुकम्पनीय इति.

(२)

अथ काल्यापनं वृथा मन्वाना संयोगितया लोचनसंकेतेन
सूचिता सा कर्णाटकी दासी प्रगल्भा सस्मितं जगाद—राजन् ?

यद्यपि युवयो: परस्परमनुराग प्रत्यक्षएव. तथापि सखीस्नेहो मा वाचालयति–इय सत्यमेव त्वदर्थं पितृकोपपात्रता लब्ध्वाऽत्यन्त दुःख.न्यसहत. तथापि लोकमर्यादाऽस्माभि: पालनीयैव अन्यथा खलोऽय लोकः शुद्धमनुरागमपि अन्यथा भावयते. नहि त्वदनुराग-वशाऽपीय स्वपितृकुल कलंकयितुमिच्छति. तस्मादिय नः सखी त्वया गान्धर्वेण विवाहेन विवाहनीया. पश्चाच्च लौकिको विवाहो-त्सवो यथावसरं विधेय. बव्हो हि राजर्षिकन्यका अनेन विवाहेन महद्भि पराक्रमशालिभिर्भूपालै: स्वीकृता एव. तत्कृपया त्व गाधर्व-विवाहसामग्रीसंपादनार्थमनुमोदस्वेति.

राजाचेमाममृतवाणीं निशम्य पर सन्तुष्ट सानन्दमाह. भद्रे! अवश्य भवतीभि स्वसखीकल्याण चिन्तनीय. सखि! यत्त्व गाधर्व-विवाहविषयेऽवदस्तत्सर्वं तथैव नात्र संशयः. अह तु मन्ये यदा च प्रियया स्वमनो मह्य समर्पितं तदैव मयाऽपि तद्गृहीत. तेन च तदानीमेवावयोर्विवाहः सवृत्त. विवाहोनाम परस्परमनुरक्तयोर्यूनोः कयापि नियमरीत्या समेलन. तच्च वैदिकरीत्या वाऽवैदिकरीत्या वेत्यन्यदेतत्. एषा रीतिश्च गौणी, विवाहे मुख्यं कारण परस्परानुराग एव. स चेद्विद्यते तदा लोकलज्जारक्षणार्थं लौकिकी रीतिः करणीया. स चेन्नास्ति तदा केवलेन लौकिकेन विवाहविधिनाऽनुरागो नोत्पद्यते. तद्यथा युष्माकमभिमत तथैव भवतु. अहं च सर्वथा युष्माकं युष्मात्सख्याश्च वशवद इति ज्ञातव्यमिति.

इमा चानुमितिं लब्ध्वा कृतकृत्या सानन्दा सा दासी त्वरित-मुत्थाय सर्वं विवाहसाहित्यं–द्वे महत्यौ पुष्पमाले, कुकुम, नीराजन-

मित [illegible] गृहीत्वा महत्या [illegible]. [illegible] सने पृथ्वीराज समुपावेशयत. [illegible] संयोगिता. [illegible] गिताहन्ते माला दत्वा—'इमा माला [illegible] मदनाग्नि साक्षीकृत्य त्वत्कण्ठे समर्पयामि. [illegible] हृदयेन समं मेलयती चिर तिष्ठतु' इत्यु[illegible] पृथ्वीराज [illegible].

पृथ्वीराजोऽपि स्वयमेव द्वितीया माला गृहीत्वा—मदीय हृदय त्वयि कियतमनुराग बिभर्तीति ज्ञानायानया मालया सम प्रेषयामि. तच्च यावच्चद्रादिवाकर कोमलेऽनुरागपरिपूर्णे प्रियाया हृदय एव तिष्ठतु—इत्युक्त्वा संयोगिताया कण्ठे माला समर्पयन्. संयोगिताऽपि स्वप्रियकरस्य पृथ्वीराजस्य भाषण समाकर्ण्यात्यत सतुष्टाऽत्मान कृतकृत्य मेने.

अथ सा दासी तावुभौ सुवर्णमये पात्रे भोजनार्थमुपावेशयत्. तावपि महता मोदेन रुचिरपक्वान्नग्रासान् परस्पराभ्या वितीर्य स्वानुरागं प्रकटीचक्रतु . विरचितभोजनौ तौ ताम्बूलमादाय स्वस्वस्थाने तिष्ठन्तौ विविक्तताल्लाभार्थं सा दासी जगाद. सखि! तावदत्र तिष्ठ! अह च यावत्सारिकया सहेमं शुक मेलयित्वाऽगच्छामीति. तामपसृतां वीक्ष्य खिन्नामिव ता स्वप्रेयसीं चतुर पृथ्वीराज. स्वाकमारोप्य शनैः शनैस्तद्भयमपनीय नानाविलासाश्चक्रे.

(४)

अथ सप्रवृत्ते कुक्कुटारावे, प्रज्वलिते प्राग्दिशाया मुखे, अस्ताचलशिखरसगते रात्रीपतौ, सूर्यप्रवेशजवनिकायामिव संध्याया

[illegible] प्रत्यासु [illegible] [illegible] [illegible] निर्दिष्टासे- [illegible] [illegible] [illegible] [illegible] ततस्तेन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] सर्वे [illegible] [illegible] तस्या.

[illegible] महान्त- [illegible] [illegible] पृथ्वीराज [illegible] [illegible] स च सर्व वृत्त [illegible] सा च वियोगदुःखाकुला दुःखानु- [illegible] पुनरपि [illegible] गृहीताऽनुज्ञा ददौ. [illegible] च तस्मात् संयोगिता [illegible] तस्माद्भवनान्निर्गत्य [illegible] च तस्मिन् [illegible] सति निष्को- [illegible] पृथ्वीराजो- ऽपि [illegible] निष्कोषीकृत्य [illegible] यथा ते सर्वेऽपि यवना स्वर्लोकं जग्मुः.

अथ सप्रियकरं रक्षकैराक्रान्तं युध्यमानं प्रेक्ष्य चिन्तातुराया प्रियाया संयोगितायास्तं विजयिनं दृष्ट्वा सन्तुष्टाया विजयपारितोः

पिकमिव स्मेरवदनदर्शनं कटाक्षपातं गृहीत्वाऽतिजवेन, स्वमेनानिवेशं प्राप. तत्र च जयचन्दसेनासागरं निर्जित्य पृथ्वीराजादर्शनेन चिन्तातुरान् सकलान् सामन्तान् वीक्ष्य समतुष्यत्. स्वपितृव्यस्य कहचहाणस्य पादयोरपतत्.

स तु वृद्धः स्वभ्रातुष्पुत्रं राजाधिराजं पृथ्वीराजं कुंकुमतिलकांकितभालप्रदेशं विवाहकंकणमंडितकरं वीक्ष्य विस्मितः सहासमपृच्छत्. राजाधिराज ! किमिद ! कुत संपादितमिदं कंकणं कुंकमतिलकश्च ! मन्ये संयोगिताहरणमनुष्ठितमत्रभवताऽऽयुष्मता. यदि सत्यमेव कनोजाधिपकन्या विवाहिता तदा तां पुनरपि ब्राह्मण इव वा वैश्य इव वा श्वशुरगृह एव त्यक्त्वा कथमागत. ! इति. पृथ्वीराजोऽपि संभूतं सर्वं वृत्तं निवेद्य कनोजाधिपेन सह युद्धप्रसंगे निश्चितकल्पे प्रत्यवायो मा भूदिति मन्यमानेन मया नानीता सेति जगाद.

अथ सर्वेऽपि सामन्ताः सर्वमपि स्ववृत्तं निवेदयामासुः तत्र रंगडीरायस्य निरतिशयं शौर्यं तथा तद्वध च निशम्य पृथ्वीराजोऽपि परं दुःखायतेस्म. ततश्च दुःखं विहाय पृथ्वीराजः सर्वानपि स्वसामन्तास्तथा स्वपितृव्य कहचहाण किंकर्तव्यमित्यपृच्छत्. ते सर्वेऽपि-पृथ्वीराजेन संयोगितां गृहीत्वा दिल्लीनगरं प्रति गन्तव्यं. अनुधावतश्च कनोजाधिपस्य सैन्यं स्थाने स्थानेऽवस्थितैरस्माभिश्चाक्रम्य पराजेयं. सर्वथा वय यथाशक्ति जयचन्दसेनां प्रतिबध्नन्तः पृथ्वीराजं दिल्लीगमने साहाय्यायिष्याम इति.

[illegible] सम [illegible] इति प्रत्युवाच.

[illegible] स्वगत [illegible].

तत [illegible] सेनया [illegible] कनोजाधिप- [illegible] प्रतिपादयामास. [illegible] स्वापरादिक्- [illegible] शिखरेषु [illegible] मार्गानुसरण [illegible] सति. [illegible] धात्सु सत्सु, [illegible] शशांकनानि [illegible] सति, [illegible] विरचितसंध्योपासन पृथ्वीराज [illegible].

[illegible] पूर्वदिशो [illegible] कमल इव, रजतकुंभ इव, [illegible] इव, फेनपुंज इव, जातीकुसुमस्तबक इव मृगलाछने, राज- पुरुषैरिव [illegible] रमणीय प्रदर्शितेषु न्यायमार्गेष्विव गगनमार्गेषु, [illegible] शारदी पूर्णिमाज्योत्स्ना संयोगितया प्रेषिता [illegible] स. सानंदमश्वमारुह्य सह सर्वै: स्वसामन्तैर्जवेन तन्मंदिरं प्रति प्रचचाल.

संयोगिताऽपि स्वप्रियकरस्य वचनमनुस्मरन्ती चन्द्रोदयदर्शन- प्रक्षुब्धानंगसंतप्ता पवनसमीपं वातायने तिष्ठंती तदागमनमार्गासक्तदृष्टि-

रचिरतमतप्यत् यथ यथा च वेलायनेम्म पृथ्वीराजस्तथा तथा ना निष्टकल्पनाकुलमति सा राजकन्या संयोगिता स्फीताक्रन्दना सततमश्रुमुक्तासतति मुमोच ।

अत्रान्तरेऽश्वस्य रव श्रुत्वा सत्रासचेतना स्वप्रियकर प्राप्त वीक्ष्य नष्टतदा सत्वर धावमाना तमानयितु तामेव दासी प्रेषयामास. अन्याश्चोपहारस्य, शय्यागृहस्य, क्रीडागृहस्य, स्नानगृहस्य, सन्नाहे-ऽस्त्वरयत्. सा च दासी पुरतो गत्वा पृथ्वीराज तत्सहायाश्चानयत्. संयोगिता च पृथ्वीराजेन सह समागतान् दश पुरुषानवलोक्य चेतः-क्रान्ता भीतिविह्वलाऽभवत्. पृथ्वीराजश्च तदवस्थामवेक्ष्य स्वयमेव सर्वं वृत्तमवदत् प्रिये ! एतानकस्मादगतान् वीक्ष्य त्वं शङ्किष्यसे परन्तु नैते परकीया किंतु मदीया सहाया एव एते च पितृव्यचरणास्तव श्वशुरा एवेति. स्वप्रियस्येदं भाषणं निशम्य लज्जाकुला सा तस्मै करुचव्हाणाय परमविनयेन नमश्चक्रे.

अथ सर्वेषा तेषा सामन्ताना सेवासु स्वदासीर्नियुज्य स्वयं पृथ्वीराजेन समं विलासमंदिरं प्राप्ता ता प्रियकरीं पृथ्वीराजोऽवोचत् —प्रिये ! अद्य खलु त्वया सहास्मिन्विलासमंदिरे विलसितु नागतः किंतु त्वां स्वराजधानीं दिल्लीनगरं नेतु अस्मिन् कर्मणि च मम सहाया एते सर्वेऽपि सामन्ताः. तत्किं मन्यसे त्वमिति

सा चेमा वाच निशम्य विस्मिता प्रथममुपहासमेव मेने. ततश्च पृथ्वीराजेन भूयोभूयो निवेदिताऽवदत्—प्राणेश्वर ! इमे प्राणाः पूर्वमेव युष्मच्चरणयोरर्पिता एव. पुनरपि भवद्भिः स्वयमागत्य सार्थकी-

[illegible] इति पश्चात्ताप तूते. प्रसिद्ध [illegible] पितुरस्य स च राजन्यवर्गे [illegible]-[illegible] न प्रतिपादयन्ति यद्यपि भवन्तोऽपि [illegible] वा [illegible] वा [illegible] वा गुणतो वा न्यूनास्तथापि [illegible] स च पुत्रनिरपेक्षता स्वसुता निशम्य [illegible] स्यात् तस्मादेव दिल्ली-[illegible]. सा च [illegible] निशम्य क्रुद्धोऽपि जन-[illegible] तदनायाससाध्येऽस्मिन् [illegible]

[illegible] सविचारमभाषत. [illegible] पिता स्वां गृहीत्वा गच्छतो ममानिष्टं कुर्यात् [illegible] तदनिष्टं न कुर्यादिति कथं खलु [illegible] तु न जानामि. तदनयोरुभयोरावयो-[illegible] वा नेय इति न जानामि तथापि [illegible] तिष्ठावः. तत्र यद्यनिष्टं वा स्यादिष्टं वा [illegible] मन्ये. किंच यद्यपि तावत्तव पिता सेनयाऽ-[illegible] मदीयसामन्तान् स न पराजेतुं शक्नोति. स तु कोपे-[illegible] मदीयैः सामन्तैः स्थाने स्थाने आक्रम्य क्षपितबलो [illegible] नाग इव न किंचित्कर्तुं पारयेत् इति.

[illegible] वृद्धः कन्हचन्द्राण' सावेशं जगाद–वत्से ! सयो-गिते ! कामपि चिन्तां मा कुरु. त्वदीयः पिता कोपाकुलस्तव पतिं

बन्दीकर्तुमनुगच्छेच्चेदस्मान्निहत्यैवाग्रे गच्छेन्नान्यथा. तद्यथा पितरं
त्यक्त्वा स्वेच्छया दिल्लीपतिर्वृतस्तथैवेदानीं दिल्लीगमनाय सन्नद्धा
भवेति अन्ये सामन्ता अपि तथैवावदन् तदानीं साऽपि सर्वेगिता
भर्तुर्वचनं याज्ञां शिरसा स्वीकृत्य दिल्लीनगरगमनार्थं सन्नद्धाऽभवत्.

(२)

उपरिकथितरीत्या विक्रमादित्यवंशजेषु हस्तिनापुरराज्यम् पालयत्सु सत्सु चरमोऽनंगपालनामा राजा बभूव. स च सकलगुणसंपन्नो धार्मिक सदाचाररतो न्यायेन प्रजाः पालयन्धर्मभीरुरासीत्. तस्मिन् राजनि पितृवत्प्रेम्णा प्रजा पालयति सति सर्वेऽपि वर्णाः स्वस्वविहितकर्मकारिणः सुखस्य परां काष्ठां प्रापुः. परकीया यवनादयोऽन्या भारतभुवः संपत्तिं वीक्ष्य नितरां व्यसयन्त. स्थाने स्थाने च कनकखनीः हीरकनिधीन् सूक्ष्माणि वस्त्राणि सर्वनित्यव्यवहारवस्तुसौलभ्यं च पश्यन्त इमां जेतुमैच्छन्. सुन्दररमणीरत्नपरिपूर्णान्तःपुरशालिनोऽपि तस्यानंगपालस्य सुतमुखकमलदर्शनसुखं दुर्लभमासीत्. सोऽपि सततमीश्वरभक्तिमेव संसारार्णवतरणे नौकां मन्यमानः सर्वदा परमात्मानमभजत. वाचका ' अयं पुण्यश्लोकोऽनंगपाल एवास्मच्चरित्रनायकस्य पृथ्वीराजस्य मातामहः. यद्यप्यस्य राज्ञो न तनय आसीत्तथापि सरस्वतीलक्ष्म्याविव द्वे कन्यके आस्ताम्. तयोर्मध्ये ज्येष्ठा कमलादेवी सुविख्यातायाजमीराधिपाय सोमेश्वरनाम्ने भूपालाय प्रदत्ता. अन्या च कनोजाधिपतये विजयपालाय प्रदत्तासीत्. तत्र परमपतिव्रता कमलादेवी अस्मच्चरित्रनायकस्य माता. तथैव कनीयस्या अपि पुत्रो जयचन्द्रो नाम

वाचका ' पुण्यश्लोकस्य पृथ्वीराजस्य मातृपक्षो वर्णित. इत्युक्तेऽयम्

नवमो गुच्छः ।

१ संयोगितापृथ्वीराजयोः प्रयाणम्.
२ जयचन्द्रस्य पृथ्वीराजानुधावनम्.
३ आततायिकारकण्ठीरवयोः संग्रामे पतनम्
४ उभयसैन्ययोस्तुमुलं युद्धम्.

(१)



अथ दिल्लीनगरगमनार्थं कृतनिश्चया सा राजकन्या संयोगिता प्रथमतः स्वीयं परमप्रेमास्पदं सखीमण्डलमपृच्छत्. तच्च स्वसख्या मनोरथस्य साफल्यमवलोक्य संतुष्टं रतिमन्मथयोरिव सर्वथानुरूपयोः संयोगितापृथ्वीराजयोर्विलासान् द्रष्टुं बद्धकुतूहलं तत् संयोगितावियोगवार्तामकस्मात्समागतां निशम्य विस्मितं मुहूर्तं नाम-मौनमिवाभवत्. ततः कथमपि महता विवेकेनावधृतशोकं तत् संयोगितायाः मुखं विलोक्य स्वदुःखमजहात्. विज्ञापयामि च सखि !

पूर्वार्जितैः सुकृतैस्त्वं द्वितीयं मन्मथमिव सुंदरं पुरंदरमिव प्रतापशालिनं सम्राजं पृथ्वीराजं पतिमलभथाः. त्वं च दिल्लीपतेः शचीवेन्द्रस्यार्ध-भागिनी संवृत्ता. तदिममैश्वर्यातिशयं प्राप्यास्मान् मा विस्मर ! वयं तु भवत्या विस्मृता अपि रात्रिंदिवं सीतापतिं त्वत्कल्याणायैव प्रार्थयिष्याम इति.

राजकन्या संयोगिताऽपि चिरसहवासिनीनां सखीनां वियोग-दुःखेन व्याकुला तासां प्रेममयीं पाथेयमिव विज्ञप्तिमाकर्ण्य संतुष्टाऽश्रु-परिपूर्णनेत्रकमला सादरं सर्वा अपि परिष्वज्य सगद्गदमवदत् -सख्यः ! अहं च यद्यप्यधुना दिल्लीपतेरंशभागिनी संवृत्ता तथापि आत्मानम् युष्माभिः समं नानाविधक्रीडारतां कनोजपतेः कन्यामेव भावयामि. ये खलु संपत्तिं विपत्तिं च नदीप्रवाहस्य वृद्धिक्षयाविव स्वावस्थां मन्यते न ते कदापि स्वात्मानं स्वकीयान् वा विस्मरन्ति. ये तु हीनमतयः संपदागममदोन्मत्तास्ते स्वात्मानमेव विस्मरन्ति तदा च का कथा स्वकीयानां स्मरणस्य. सख्यः ! तावत्कालमेव भवतीभिर्मदीयं दुःखं सह्यं यावन्मम भर्तरि पृथ्वीराजे वर्तमानस्तातस्य कोपो न शाम्येत्. शान्ते च तस्मिन्नहं युष्मान्दिल्लीनगरं समानाययिष्यामीति.

अथ राजकन्या कथमपि तासामनुज्ञां गृहीत्वा स्वदासीमण्डल-माप्रष्टुं समागच्छत्. तच्च दयालुस्वामिन्या वियोगदुःखेन व्याकुलं सततनिपतदश्रुजलबिन्दुनयनोत्पलं सर्वमपि गमनसन्नाहमकरोत्. राज-तनया संयोगिताऽपि तन्ममावस्था धैर्यं समवलंब्य जगाद—दास्यः ! अद्यारभ्याहं युष्मद्वियुक्ता भविष्यामि. अहं यथाशक्ति शीघ्रमेव

एवं सर्वं व्यवस्थाप्य गृहीतसर्वानुज्ञाया अपि संयोगितायाः पादयुगुलं तस्मान्निवासात् सहसा निर्गन्तुं नाशकत्. यद्यपि सा स्वयंवृतेन हृदयवल्लभेन समं गन्तुमुत्सुकैवासीत्तथापि कन्यायाः पितृगृहमोहो बलवत्तरएव. स चैनामस्मिन् समये स्ववशा चक्रे.

अथ वेलायमानां स्वकान्ता संयोगितां वीक्ष्य पृथ्वीराजः पुनरपि जगाद–प्रिये! निर्गमनवेलाऽतिक्रामति. अस्माभिश्च सूर्योदयात्पूर्वं महान् पंथा आक्रमणीय एव. अन्यथाऽनुधावंस्तव पिताऽस्वयोरनिष्टं कुर्यात्. यद्यपि अत्र चिरं वसन्त्यास्तव वियोगदुःखं दुष्परिहरं तथापि मदर्थं त्वया यदा स्वजनकस्नेहोऽपि समुज्झितस्तदाऽस्य स्थानस्य तद्वर्तिना वस्तूनां स्नेहत्यागे का क्षतिः. तत्क्षणिकमिमं मोहं विहाय मया सह गन्तुं सन्नद्धा भवेति.

बुद्धिमती संयोगिताऽपि स्ववल्लभस्येदं भाषणमाकर्ण्य निर्धूतमोहपटला सत्वरं स्वदासीमश्वमानेतुमादिदेश. पृथ्वीराजश्चाश्वानयनोद्यता तां दासीं प्रतिषिध्य संयोगितामवदत्–प्रिये? गच्छतोरावयोर्मार्गे विघ्ना अवश्यं भविष्यन्ति. तदस्मिन् समये भिन्नमासनमनुचितं. यत्खलु इष्टं वाऽनिष्टं वा स्यात्तदुभययोरेव स्यान्नैकस्य. मार्गे चातिवेगेन धावता मया सह त्वं धावितुं न शक्ष्यसि. तद्विरम भिन्नाश्वारोहणव्यापारात्. त्यक्त्वा च लज्जां मम पृष्ठत एनमेवाश्वमारुह. एष मम विश्वासपात्रं कुलीनोऽश्वः शीघ्रमेवावां स्वराजधानीं नेष्यतीति. साऽपि संयोगिता युक्तमेवेदमिति मन्यमाना दासीजनस्य प्रणामान् गृहीत्वा तस्मै नानाविधं पारितोषिकं वितीर्य स्वकण्ठगता

(२)

अथ रात्रीपतिः पृथ्वीराज इव स्वपत्नीं संयोगितामिव रात्रीं गृहीत्वा स्वनिवासमगच्छत्. सर्वा अपि तारका संयोगितादास्य इव स्वस्वामिनीवियोगदुःखाकुला प्रासादइवाकाशे लीना अभवन् सर्वेऽपि पक्षिणो जयचंदाय कन्याहरणं कथयन्त इव सर्वत्र व्यचरन्. पृथ्वीराजमार्गप्रदर्शनार्थमिव भगवान् सविता पूर्वाचलमारुरोह. सर्वेऽपि प्रजाजना अविदितरात्रिवृत्ता यथानियमं स्वस्वव्यापारमन्वतिष्ठन्.

तदानीं कविराजश्चन्द स्वीयमाह्निकं सर्वं विधाय देवीं भगवतीमुपास्य कनोजाधिपस्य दर्शनार्थमगच्छत्. राजा च तदानीं राजसभायां स्थित्वा राजकार्याणि सामन्ताहृतान्युपायनानि अपश्यत्. चंदकविश्च स्वसेवकाद्वारा स्वागमनं राज्ञे कथयितुं द्वारपालाय न्यवेदयत्—सोऽपि श्रुततत्कीर्तिर्वेज्ञातराजस्नेह. सहसा गत्वा तदागमनं निवेदयामास राजा जयचंदोऽपि कविराजस्य प्रातरागमनकारणं जिज्ञासमानोऽप्यन्ततोऽलब्ध्वा सचिन्त शीघ्रमेन तत्प्रवेशनार्थमादिदेश. सोऽपि द्वारपालः सत्वरमागत्य कविराजं प्रवेशयित्वा राजदर्शनमकारयत् जयचंदोऽपि सादरं विहितसत्कारं उच्चासने तं निस्पृहं चन्दकविमुपावेशयत्. चन्दकविश्च सम्प्रदायानुरूपं शुभैराशीर्वचनैस्तं कनोजाधिपतिमनुजग्राह. कनोजाधिपश्च पृष्टकुशलप्रश्नः सादरमपृच्छत्--कविश्रेष्ठ! अयं च समयो भवतो भगवतीसेवायाः! तदद्य कथं भगवत्युपासनानुष्ठानं विहाय भवान् प्रातःकाल एव मम सभामलमकरोत्! इति

स्वीकृत्य चिरं विलस्य प्रभातकाले स्वनिवासं गन्तुं निर्गतवन्तः स एकाकी निरीक्षकाध्यक्षेण सह युद्ध्वा सर्वानपि तान् यमालयातिथी-नकरोत्. इति.

निशम्य च स्वसेवकघातं तथा स्वदुहितृहरणं राजा जयचन्दः कोपसंतप्तः सेनापतिमाहूय--सेनापते! अहं च मध्यान्हेऽद्यैव तं कन्याचौरं पृथ्वीराजमनुधाव्य बंदीकर्तुं निर्गच्छामि. तत्सर्वां सेनां सन्नाह्य त्वमपि मया सहागच्छेत्यादिशत्. सर्वान् सामन्तानपि तथैव न्यवेदयत्.

अथ कथमपि स्नातभुक्तः जयचन्दः सेनापतिनिवेदितसेना-सन्नाहो महत्या त्वरया सामन्तमण्डलवृतस्तं पृथ्वीराजमनुदधाव. तं च स्वजामातुः शासने समुद्यतं जयचंद्रं वीक्ष्य कोपाकुलो भगवान् सहस्त्ररश्मिः प्रखरैः किरणैः संतापयामास. वातश्च रविसंतापसंतापितः प्रतीपं वहन् सैनिकान् सामन्तानत्यन्तं क्लेशयामास.

गृध्रादयो मांसलोलुपाः पक्षिणश्च भयसूचकैः शब्दैस्तमस्मा-द्व्यापारादुपरन्तुं बोधयन्त इव सेनां परितो विचेरुः. जलाभावतृ-ष्णासमाकुलाः सैनिका रविसंतापमसहमाना भूमितले निपत्य प्राणान्विससर्जुः. अन्ये च बलवन्तो प्रखरसूर्यसंतापेन संतप्ता रुग्णा एवाभवन्.

एवं स्वविरोधीनि पंचभूतान्यवलोक्याऽपि अखिन्नः कोपाति-रेकप्रनष्टमतिस्तथैव महता जवेनानुदधाव.

अथ मदापतत्-अंधमदमत्तेभराजिसंकुलं, असंख्यदुर्दांतवाजि[illegible]. प्रतिफलितसूर्यप्रकाशादुर्दर्शभल्लभीषणं, सकलमध्यभागविराजमानखड्गलतिकाभयकरसादिकुलं, तीव्रविषदिग्धफलकबाणसंनयविराजमानं, अनेकशरधानुष्कगणभूषितं, मध्यभागे शनैः प्रचलन्मत्तहस्तिमंडलमंडित, अनेकलोहपेटिकारक्षितकोशं, तत्पश्चादश्वशकटस्थापितभक्ष्यसंभार, सेनामध्यविराजमानसेनापतिकरधृतराजवैजयंतीसुन्दर, महागजारूढकनोजाधिपानुसृतं सैन्यमवलोक्य रोद्धुकामो 'गोविंदरायगेहलोट' नामा पृथ्वीराजसामंत. स्वसैन्यं स्वामिभक्तसैनिकभूषितं गृहीत्वा गंगाप्रवाहस्य पर्वत इव तस्य सैन्यस्य मार्गेऽतिष्ठत्. तथाकस्मादागत प्रतिबंधकारणं विलोक्य क्षणमात्र स्तब्धं कनोजाधिपसैन्यमभूत्. जयचंदस्तु प्रतिबंधक तत्पृथ्वीराजसैन्य वीक्ष्य क्रुद्ध. सहसा तदाक्रमणाय सेनापतिमादिदेश.

गोविंदरायस्तु तं कनोजाधिपस्यागाधमनन्त सेनोदधि प्रेक्ष्य तत्रोध आत्मानमशक्तं मन्यमानोऽपि स्वामिहितदक्षः पृथ्वीराजस्य निर्विघ्न दिल्लीगमने साहाय्य चिकीर्षुर्महतोत्साहेन तेन समं योद्धुं प्रचक्रमे.

अथ सम्प्रवृत्ते तीव्रक्षेपाहतखड्गसंपातध्वनिभीषणे सावेशं युध्यमानवीरसंमर्दमनोहरे युद्धप्रसंगेऽल्पबलोऽपि गोविंदरायः कनोजाधिपसैन्यं जर्जरितमकरोत्. जयचंदस्तु तस्य शौर्यं स्वामिभक्तिमवलोक्य विस्मितः परमाभिननन्द ततश्च तं गोविंदरायमपि स्वर्गं प्रेषयित्वा कनोजाधिपो जयचन्दोऽग्रे प्रयाणमकरोत्. अचिरादेव चन्द-

पुण्डीरनामा सामन्तस्तेनामात्य पनि पलायितवान्, तथापि पु-
सैन्य क्षपयित्वा तमपि निहत्य महता वेगेन जयचन्द्रो ययौ.

३)

अथ क्रमेण प्रतिनिवर्तमानेन पृथ्वीराजसामन्तानिहत्य समैन्य कनोजाधिपे जयचंद दिल्लीनगरमभिलक्ष्य पृथ्वीराजमनुधावति सति परमशूरोऽतिवीरो सैनिकैः सह 'आनताई' नामा सामन्तः पुनरपि प्रतिकूलो भूत्वा रोद्धुं मार्गेऽतिष्ठत् वाचकाः! अस्य सामन्तस्य संबंधिनी कापि विचित्राऽऽख्यायिकाऽस्ति. सा चेत्थम्—

पुरा खलु पृथ्वीराजस्य सामन्तश्चौरंगीचव्हाणनामा कोऽपि भूप आसीत् स च परमस्वामिभक्त स्वधर्मनिरत सज्जन आसीत्. बहिषु भार्यासु सतीष्वपि स चिरात्तनय न लेभे. अथ स्वराज्ञीषु मध्ये काचनापन्नसत्वा निशम्य सन्तुष्टो महताऽऽनन्देन प्रसूतिसमय प्रत्यपालयत् सम्प्राप्ते तु प्रसूतिसमये पारितोषिकलोभेनैतस्तनो धाव-मानैर्मिथ्यैव कथितपुत्रजन्मा स चौरंगीचव्हाणो महता प्रमोदेन-पुत्रोत्सवमकरोत्. ततश्च ज्ञातसत्यवृत्तोऽपकीर्तिभयाच्चिन्तातुर कथ-मपि तत्सत्य वृत्त गोपायामास अथ गतेषु केषुचिन्मासेषु प्रवर्धमाना तां कन्यका वीक्ष्य दुष्कीर्तिभीत स भूपालस्ता निभृत गृहीत्वा शंभोर्देवालयमगच्छत् आगत्य च तां कन्यका शंभवे समर्प्यात्मान-मपि तद्बलि विधित्सु स चव्हाणः शंकरमध्यायत्. तस्य भक्ति तथा दृढनिश्चयं च विलोक्य सतुष्टो भक्तवत्सल. शंकरस्ता कन्यकां पुमासं विधाय तस्मै समर्पयामास. समर्प्य च जगाद—राजन्!

सुप्रसिद्धचाहमाणवंशजो वीसलदेवो नाम महाविक्रमशाली राजाऽजमीरक्षेत्रे राज्यमकरोत्. इदमेवाजमीरनगरं द्रोणगिरिशब्देनाऽपि निगद्यते. अस्तु. अस्मिन् राजनि स्वीयं राज्यं न्यायेन शासति सति बुभुक्षिता गृध्रा इवैते महमदीया म्लेच्छा भारतभुवं जेतुं प्रावर्तन्त. तान्निराकर्तुमयं वीसलदेवः सर्वान् क्षत्रियवंशसंभवान् नृपान् साहाय्यार्थमाह्वयत्. सर्वे च नृपास्तदाह्वानमङ्गीकृत्य तद्राजधानीमाजग्मुः. केवलं गुर्जराधिपो भीमदेवो नाजगाम. तदनागमनं च दर्पादेवेति मत्वा वीसलदेवः ससैन्यं भीमदेवमाक्रम्य रणाङ्गणे जिगाय. यत्र च तेन सह वीसलदेवस्य युद्धं बभूव तस्मिन् स्थले स्वयशःस्मरणार्थं राजा वीसलदेवः स्वनामाङ्कितं महन्नगरं 'वीसलनगर' नामकं [illegible] वाचकाः! अस्य वीसलदेवस्य संबन्धिनीमाख्यायिकां चन्दनामा कविवर्यः स्वविरचिते रासाग्रंथे न्यरूपयत्. सा चेत्थम् -

अयं वीसलदेव एकां नागकन्यां परिणीतवान्(?) [illegible] प्रेम्णा वशीकृतः स वीसलदेवस्तस्यामेव परमानुरक्तोऽभूत्. [illegible] सापत्न्य. परमद्भुतम् सा च नागकन्या [illegible] [illegible] सोऽपि तु [illegible] प्रतिदिनमा[illegible] [illegible] राजा [illegible] विचारयामास(?) [illegible]

[illegible] पुत्र [illegible] एष च [illegible] [illegible] पुत्र [illegible] राजा [illegible] प्रतार- [illegible] [illegible]

[illegible] राजा [illegible] कृत्वा [illegible] वन [illegible] तत्र च [illegible] उपचरति तस्मिन् [illegible] राक्षसो [illegible] स [illegible] गोवधपातकपरामुष्टमात्मानं [illegible] प्राणास्त्यक्तुं [illegible]. तदानीं च [illegible]- [illegible] पर निपिपत. जगाद [illegible]! [illegible] च विप्रदेहादर्श मरणमनु- [illegible] हि पुरो सम्मुखे [illegible] प्रतिनट [illegible] तेन च निहतेन [illegible] [illegible] [illegible]व्यापारात्. [illegible] [illegible]धिपयोर्महान् समागो भविष्यति तत्र [illegible] इति. स एव [illegible]कण्ठीरः प्रमारराजो [illegible] स्वेच्छमपास्यत्. अस्तु.

एवं तौ उभावपि वीरौ दैविकशक्तिसम्पन्नौ महतोत्साहेन युद्धं [illegible]. तत्र [illegible] अगणितसेनासहायः केवलं [illegible] [illegible]शिरोभूषणधारी महता

शौर्येण पृथ्वीराजसेनापतिमाततार्ईमाक्रम्य नदीवा सेना द्विगाक्र-अन्वधावत च महता जवेन दिल्लीनगरमभिलक्ष्य.

अचिरादेव स सोऽपश्यन्महता वेगेन धावन्तौ, सैनिकैरनोध्य-मानौ मल्लखड्गधारिणौ संयोगितापृथ्वीराजौ. तौ वीक्ष्य जातानंदः स कहरकण्ठीरोऽतित्वरया पृथ्वीराजमाक्रम्य स्वहस्तगतया ज्यया तं पृथ्वीराजं कण्ठदेश आचकर्ष. साध्वी संयोगिता स्वपतिं स्वपितृ-सेनापतिना समाकृष्टं विलोक्य क्रुद्धा तस्मिन्नेव क्षणे स्वमव्यविराज-माना तीक्ष्णां छुरिकां निष्कास्य तया तां ज्यां चिच्छेद. कहर-कण्ठीरस्तु तदलौकिकं संयोगितायाः शौर्यं पतिनिष्ठं प्रेम च वीक्ष्य विस्मितोऽनुधावनान्निवृत्तः कनोजाधिपसमीपमाजगाम. अगदच्च— राजन्! एष दिल्लीपतिः पृथ्वीराजः संयोगितां न हरति किंतु संयोगिता स्वात्मानमेव हारयति यदा च स्वकन्यैव शत्रु साहाय्ययति तदा विजयस्याशा दुर्लभा. अस्तु. अस्माभिश्च समारब्धं कार्यं समापनीयमेवेति. कनोजाधिपश्चेदं वृत्तं निशम्यात्यन्तं समतप्यत्.

अथ पुनरपि स आततार्ईसामन्तः स्वसैन्यं व्यवस्थाप्य महता वेगेन कनोजाधिपसेनामाचक्राम. कहरकण्ठीरोऽपि तदाक्रमणं शौर्येण विफलीकुर्वन् युयुधे. अचिरादेव संमुखमागतौ तौ द्वावपि वीरौ स्वयुद्ध-चातुर्येण सैनिकानां विस्मयं जनयतौ परस्पराघातेन प्राणं तत्यजतुः.

राजा जयचंदः प्रतापशालिनः कहरकंठीरस्य स्वर्गगतिं निशम्य-खिन्नोऽपि अभग्नोत्साहः पुनरपि जवेनाग्रे प्रचचाल. ततश्चाग्रे गच्छन्तीं कनोजसेनां रोद्धुं काशीराजो नाम पृथ्वीराजसामन्तोऽग्रे-

एकदाऽयं नापितेन स्वकेशान् कर्तयन् कुताश्चित् कारणात्क्रुद्धेन राज्ञा पृथ्वीराजेन कोपमापितेन ताडितस्तेन च कोपाकुलो भूत्वा खड्ग निष्कोषीचक्रे. राजा च त क्रुद्धमवलोक्य सोपज्ञमं 'वत्स! अल्हन! यत् खलु वीरस्य मस्तक न तत्तस्य किंतु राज्ञ एवेति मन्वानोऽहमित्थं त्वामवदम्' इति जगाद. स तु निर्भीकिस्तदानीमेव 'राजन्! न खलु वीरस्य मस्तकमेव राज्ञ किंतु शरीरमपि तस्यैव. वस्तुतस्तु अत्यल्पमिदमुच्यते. वीरस्य बुध्यादिकमपि स्वामिनएवेति प्रत्युत्तरयामास. अस्तु.

यदा च त कनोजाधिपरोधाय मार्गे पृथ्वीराजः स्थापयित्वाऽग्रे गन्तुं प्रचचाल तदा स स्वामिभक्तो वीर· स्वमस्तकं खड्गेन च्छित्वा तस्मै दत्वाऽवदत्. राजन्! अहमस्मि देवतानुग्रहशाली. मदीयोपास्यदेवता मह्यमिमं वरमदात्. यावत्तव शिरो भूमौ न पतेत्तावत्त्वं न मरिष्यसीति. तदिद मदीय शिरो गृहीत्वा त्वं जवेन दिल्लीनगरं गच्छ. अह च सर्वथाऽनुधावन्त कनोजाधिप रोत्स्यामि. परन्तु मदीय शिरो भूमौ मा स्थापयेति.

पृथ्वीराजोऽपि तन्मस्तक हस्तेन धृत्वा जवेन गच्छन् प्रखरसंतापविव्हला सयोगिता वीक्ष्य कस्याचिन् महावृक्षस्य शीतलच्छायाया विश्रान्त्यर्थमवातरत्. राजकन्या संयोगिताऽपि प्रकृत्यैव कोमलांगी घोटकधावनेन पीडितसर्धिर्महता कष्टेन भूमाववतीर्य तस्थौ. अचिरादेव ग्रीष्मकालरविकरसंतापजानिता पिपासा तामपीडयत्. ता च पिपासाकुला वीक्ष्य पृथ्वीराजः कूपाज्जलं निष्कास्य तस्यै ददौ. सा च प्रबलपिपासा व्याकुलाऽपि स्वप्रियभर्तुर्हस्ते विराजमानं विगलद्रुधिरं रुण्डं विलोक्य सजातघृणा तज्जलं पातुं न शशाक. सर्वं

इय [illegible] निद्राऽपि जलपानविमुखी प्रबलमूर्च्छाक्रान्ता कान्ता संयो-गिता [illegible] तन्मस्तकं भूमौ निक्षिप्य हस्तौ प्रक्षाल्य नूतनं [illegible] पिपासां दूरीचकार. पतित एव तस्मिन् मस्तके [illegible] कुमारोऽपि धरणितले पपात.

[illegible] कुमारं पतितं समीक्ष्य निष्प्रतिबन्धं तत्कनोजराज-सैन्यं पुनरपि [illegible]. मार्गे पृथ्वीराजपक्षीयैर्यथाशक्ति कृतान् प्रतिबन्धान्दूरीकृत्य [illegible] इव दिल्लीनगरमागच्छत्.

अत्रान्तरे पृथ्वीराजः सह संयोगितया हाहुलीरायहमीरराम-गुरुपुरोहितचन्दकविनामकैस्त्रिभिः सामन्तैश्च दिल्लीनगरं प्राविशत्. स्वस्वामिनं च सुरक्षितमागतं वीक्ष्यानन्दसंकुला जना दुर्गाधिकारिणः सैनिकाश्च महान्तं हर्षनादं चक्रुः.

तदानीमेवान्वागतं प्रलयकालिकमेघपटलमिव दुर्निरीक्ष्यं कनोजराजसैन्यं वीक्ष्य चिंतातुराः सत्वरं दुर्गद्वारं विधाय महता सावधानेन स्वस्वविभागं परिपालयतस्ते दुर्गपालाः शत्रोरागमनं प्रतिपालयामासुः.

कनोजाधिपतिर्जयचन्दो दिल्लीनगरं समीपमागतं वीक्ष्य सानंदो महता वेगेन नगरे प्रविशन्तं पृष्ठतः स्थितसंयोगिताकं पृथ्वीराजं विलोक्य खिन्न इन्द्रप्रस्थदुर्गं रुरोध.

१ कनोजाधिपस्य पृथ्वीराजाय स्वकन्यादानलोभनम्.

२ दिल्लीनगरे विवाहोत्सवः.

३ पृथ्वीराजस्य संयोगितया समं विलासाः.

४ चन्द्रकवेर्हाहुलीरायेण समं संवादः.

५ हाहुलीरायस्य गिझनीपतिना समं दिल्लीनगरा-
क्रमणम्.

(१)



नोजाधिपो जयचन्द इन्द्रप्रस्थदुर्गमवरुध्य स्थितः स्वयमचिंतयत्–इदानीं दिल्लीनगररोधेन किम्? कुत्र? यथाशक्ति च पृथ्वीराजसामन्ता अवशिष्टा येऽस्मन्त एव. अहं तु सेनाबलसमन्वितः सर्वानपि तान् हत्वा दिल्लीनगरं विजेष्यएव. अत्र न संशयः. पृथ्वीराजश्च याव-

[illegible] युद्धेन. तं च निहत्य मम को वा लाभ ? संयोगिता तु [illegible] सहगमनं कुर्यादेव. एवं च नेन व्यापारेण जामातृवध [illegible] दिल्लीनगरजनस्यान्यविनाशो मया लभ्य . पूर्वं [illegible] ऽपि न संवृत्त . अधुना कन्याघातेन जामातृवधेन [illegible] तदधुनेऽनुचितमाभाति–तस्मै पृथ्वीराजायैव प्रीतिपूर्वकं संयोगिता समर्पणीया. यद्यपि मदीयाः शत्रवो मा हीन-[illegible]ऽपटसेनुम्तथापि संयोगितावैधव्यदु खापेक्षया तत्सदं भविष्यति नचेह तादृश. कोप्यस्ति यस्य सर्वेऽपि कामा निर्विघ्न सिद्धा . मानवा हि स्वभावत एव नानाविधान् मनोरथान् करोति परंतु सर्वज्ञ ईश्वर सर्वमेव संचित कर्म वीक्ष्य तस्य कामान् पूरयति. तदस्मिन् परतन्त्रे कामपूरणे केनाऽपि मानवेन खेदो न कर्तव्य इति तु सत्य तत्वम् .

किंच–अद्यावधि मार्गे ये ये युद्धप्रसंगा जातास्तेपूभयपक्षीया वीरा जना अगणिता एव निपातिता.. तेषा संबन्धिना च वृथैव मया शापो गृहीत . तदधुनाऽपि भावी सेनाक्षयो रक्षणीय इति. एवं चिंतयन्नपि राजा जयचंदोऽपकीर्तिभीतो दोलायमानचित्तस्तूष्णीं तस्थौ.

अथ तस्मिन्नेव समये चन्दकवि. समागतमात्मानं द्वारपालमुखेन न्यवेदयत्. राजाऽपि कर्तव्यनिश्चये तस्य साहाय्य जिघृक्षुः सादरमानीयासने समुपवेशयत् चन्दकविश्च दत्ताशीर्वचनो राज्ञो दोलायमान मनो निरीक्ष्य सतुष्ट प्रकटमुवाच-राजन् ! कनोजाधिपते ! साम्प्रत त्वयाऽनेन युद्धेन किं वा लभ्यं ? यदि दिल्लीनगर, तदा बलात्त्वमचिरादेव तत् स्वायत्तं करिष्यसीत्यत्र न संशय.. परन्त्वहं

मन्ये दिल्लीनगरविजयेन न तवाभीष्टं सिध्येत्. त्वदाभिष्टं तु कन्या हरतः पृथ्वीराजस्य शासनं. परत्वेतदशक्य-यतो जीवतः पृथ्वीराजस्य बंदीकरणं खपुष्पसदृशं. सोऽपि न वीरश्रेष्ठो यथाशक्ति युध्येव स्वर्गमलंकरिष्यति नेतरजनवत्तव कारागृहं! सती संयोगिताऽपि तमेवानुसरिष्यति. एवं स्थिते स्वकन्यायास्तथाजामातुर्घातजन्यं पातकमेव त्वं लप्स्यसे. किमेतदेव त्वदभीष्टं ? यद्येतत्तदा प्रवर्ततां घोरं युद्धं. अहं तु मन्ये—त्वादृशाः सात्त्विका राजान ईदृशाभीष्टसाधनार्थं न कदापि युध्यन्ते किंतु परपीडापरिहारार्थमेव. तामसा यवनादयो जनाः परेषां घातमेव स्वाभीष्टं मन्यंते युध्यते च. तद्विरमास्मादपकीर्तिकारिणः संग्रामात्. यथा हि प्राचीना राजर्षयः स्वकन्यास्तरुणै राजकुमारैर्गांधर्वविवाहेन व्यूढा अभिननदुस्तथैव पृथ्वीराजं संयोगितां चाभिनंद्य लोकेऽखण्डवासां कीर्तिं संपादय. यथाहि स्वकन्यां हरन्तं श्रीकृष्णं तदीयः पिताऽभिननद तथैव त्वमपि कुरु. न तावद्रुक्मिणीबंधुरिव तस्मै विद्रुह्यापयशो गृहाण. राजन्! त्वं हि क्षत्रियकुलालंकार ईदृशैः क्रूरैः कर्मभिः कुलागारो माभूः. कनोजभूपाल! पृथ्वीराजेन न तव कन्या हृता किंतु तयैव स्वयमात्माऽपहारित. किं न श्रुतानि त्वया तद्बन्दीकरणार्थमनुधावता त्वत्सामंताना वचासि. एवं स्थिते सकलक्षत्रियगणादृतो मुनिवैरंगीकृतोऽयं गांधर्वविवाहः. तमनंगीकृत्य स्वस्य क्षत्रियत्वं गमयसि तद्विचार्यातः परं युद्धस्व! केवलं युध्वा बंदीकृत्य च पृथ्वीराजं सकान्तं केवलं क्षणमात्रं स्वमनसः सन्तोषो वा श्रेयानुत परमानन्देन योग्याय पृथ्वीराजाय प्रिया कन्यां समर्प्य सकलजनसंतोषो यशश्च श्रेय इति स्वयमेव

[illegible] इति.

संयोगिना तु [illegible] नर्तितुमन्नमोदत. [illegible] संयोगिना [illegible] समं पृथ्वीराजो जयचन्द्रस्य शिबिरं प्रैषयत्. [illegible] सन्देशोऽस्माभिर्लिखितः. यथैव भवान् मन्यते तथैव भवतु. केवलं दुराग्रहेण त्वया मय्यनुरक्ता संयोगिता कारागारे स्थापिता. तन्मोचनार्थमेव मया प्रयतितं. लब्धं च यशः. तदसहमानेन त्वया पुनरपि युद्धं प्रारब्धं. इदानीं च भवानेव म [illegible] तदा [illegible] सवृत्तमिति मन्य इति.

राजा कनोजाधिपोऽपि स्वयमागतां स्वकन्यां संयोगितां महानंदेनाभिननंद. सर्वैः स्वस्वामन्त्रैः समं प्रत्युद्गम्य स्वस्कन्धावारमानयत्. संयोगिताऽपि कुलशालिनी स्वापराधक्षमायाचनाय स्वहस्तकमलाभ्यां वृद्धस्य पितुः पादौ जग्राह. जयचन्द्रोऽपि स्वस्थमना महता मोदेन सर्वानपराधानक्षाम्यत्.

(२)

अथ जयचन्द्रो बृहस्पतिसमेन विदुषा स्वपुरोहितेन सर्वविदुषां सभां कारयित्वा स्वकन्याविवाहमुहूर्तं निर्णयौ. जयचंदस्तदैकापत्यः सर्वानपि स्वाधिकारिणोऽस्मिन्विवाहोत्सवे न्यूनतापरिहारार्थ-

स्पृष्टा. सा तु क्रुद्धा तस्मिन्नेव क्षणे 'त्वं राक्षसो भव' इति तं शशाप. अचिरादेव राक्षसस्वरूपमापन्नः स वीसलदेव. सर्वांस्तन्नगरवासिनो जनान् भक्षयामास. तद्भीत्याचावशिष्टा नागरिका अन्यान् देशान् जग्मुः. तेन तन्नगरं श्मशानमिव निर्मनुष्यमभवत्.

अथ तस्य वीसलदेवस्य पुत्र सारंगदेव पितुरनन्तर स्वीयं राज्य पालयामास. तस्य च पुत्रोऽनहदेवो राज्य शासदजमीरनगरे महान्तमनहसागरनामकं तडाग व्यरचयत्. अनहदेवस्य तनयो जयपालस्तस्यानन्दढेवस्तस्य प्रतापी पुत्र. सोमेश्वर. क्रमेण द्रोणगिरिराज्यमकरोत्. वाचका ! अयमेव प्रतापसूर्यस्य पृथ्वीराजस्य पिता. अस्मिन् राजनि स्वराज्यं शासति सति कश्चन ब्राम्हण स्वपत्नीत्रासेनोद्विग्नस्त वीसलदेवं शरणं गत्वा 'मा भक्षय' इति प्रार्थयामास. स तु वीसलदेवरूपी राक्षसः साश्चर्य 'किमितीत्थं निर्विण्णोऽसीति' त ब्राम्हणमपृच्छत्. स च दीनो विप्र स्वीया परिस्थिति तस्मै निवेद्य मम पत्नी मा पर त्रासयतीति कथयामास. राक्षसश्च तस्य विप्रस्य भाषणेन सजातकृपस्तस्मै विपुल द्रव्यं वितीर्य- 'विप्रश्रेष्ठ। अह च राक्षसयोनिं प्राप्यात्यन्तमुद्विग्नोऽस्मि. तत्त्वमितो गत्वाऽजमीराधिप सोमेश्वरं वद! राजन्! वीसलदेवराक्षसस्त्वा मन्मुखेन विज्ञापयति-'मा हत्वा भक्ष' इति यद्यप्यस्मिन् रूपे मा हत्वा तेन राज्ञा भक्षणमशक्य तथाप्यह सूकररूप धृत्वा परितोऽरण्ये विचरन् मृगयार्थं समागतेन तेन राज्ञा हंतव्य . योहि मन्मास भक्षयेत्सोऽवश्यमेवालौकिकपराक्रमशालिन. सद्गुणाढ्यान् पुत्राँल्लभेत. ततोऽवश्यमेव

माज्ञापयत्. दिल्लीनगरवासिनोऽपि स्वप्रभोः प्रतापशालिनः पृथ्वीराजस्य परममान्यस्य कनौजाधिपस्य जयचंदस्य परमलावण्यवत्या पुत्र्या सह विवाह निनाम्य सानन्दा यथाशक्ति स्वस्वगृहाणि भूषयामासु.. तदानीं च तदखिलं दिल्लीनगरं स्थानेस्थाने नदद्संख्यपटह, संगीतगोष्ठीपु गायद्वारागनासहस्रकंठमधुरध्वनिसमाकुल, इतस्तत ससम्रम धावमाननागरिकपुरध्रीगणचरणकमलनूपुरशिञ्जितग्रहणव्यग्रहसगणव्याकुलम्. अगणितालकृतबालिकापादपद्मनिर्गलितलाक्षारसराजितराजमार्गं, पूर्णकुंभसकुलदेहलीप्रतिगृह. मगलगानासक्तवैश्यांगनामनोहरं, सुव्यसितासल्याश्विकगणपरिबाध, गगनागणविहरच्चित्रपटमयीभि. पताकाभिराच्छादितम्, प्रतिचतुष्कनिबद्धसुगन्धिकुसुममालानिपतत्परागधूम्रनृपवीथ्यारं. आरामोपवनविलसत्सरसीरुहसुगन्धलोभधावद्भ्रमरझकाररवमनोरमं, स्वस्वकर्मव्यग्रराजसेवकं, हस्तधृतकनकदण्डराजपुरुषनुरक्षित नूतनमन्यादिवाभवत्. यत्खलु सततं निपतद्भयंकरलोहगोलकभयकर, पिहितकपटराजद्वार, अनवरतयुध्यमानवीरगणसिंहनादव्याकुल रणक्षेत्रमिव दिनद्वयात्पूर्वमासीत्तदेवाधुनाऽगाधानन्दविलासमग्न स्व मेस्थाने स्थापितसत्कारमण्डप विवाहानंदनिमग्न वीक्ष्य को वा न विस्मयेत को वा कालस्य माहात्म्य लोकातीत न ब्रूयात्. इय सर्वा हि अलौकिकशक्तिशालिन परमात्मनो लीलेति कोवा न वदेत्? अस्तु.

जयचदस्तु स्वकन्याविवाहार्थं दिल्लीनगराद्बहिरत्युत्तम विस्तीर्णं, नानाजातीयपुष्पवीथिकासनाथं. सतत मंदमदवाहिकुल्याभि शीतल. प्रतिस्थानं विरचितकृत्रिमरमणीयजलयंत्रसुमनोहरम्, कुसुमितानेक-

च्छविभासुरं संयोगितायाः करमग्रे [illegible] पृथ्वीराजस्य हस्ते तन्निधाय सागद्गदम्—आयुष्मन्! [illegible]! पृथ्वीपते! अद्य हि हस्तस्तुभ्यं संयोगितायाः [illegible] मनोऽनुना [illegible]. साम्प्रतं तु इयं लौकिकविवाहे [illegible]. एषा संयोगिता त्वया स्वगुणैः [illegible] न खलु मया प्रदत्ता. न खलु सागरादृतेऽन्यः कश्चन नदीनां पतिर्वर्तते. अय हि करो रत्नगणमण्डितकङ्कणभूषितोऽस्याः दुष्प्राप एव. संयोगिता हि करदानमिषेण त्वयि बद्धानुरागं हृदयमेव ते समर्पयति. तदात्मवदिमां पालय. त्वया सह प्रीतिमेत्य मम कन्या विष्णोर्लक्ष्मीरिव चिरमलङ्करोतु दिल्लीराजसिंहासनमिति जगाद. पृथ्वीराजोऽपि प्रदत्तोचितोत्तरस्तस्य श्वशुरस्य पादावभिवन्द्य सर्वेभ्यो विप्रेभ्यो भूयसीं दक्षिणां वितीर्य मूर्तया कीर्त्येव तया नूतनवध्वा समं स्वावासमागमत्. जयचंदोऽपि विस्मृतपूर्ववृत्तः स्वयोग्यतानुरूपं सम्पदं दासीगणं भूविभागांश्च दिल्लीश्वराय जामात्रे ददौ. अभोजयच्चागणितान्विप्रान्. सत्कारयामास सर्वानपि पृथ्वीराजसामंतान्. विविधैरुपचारैः स्वजामातुर्मनोऽरंजयत्. मृगयादिभिरपि सर्वेषां सामंतानां मनांसि समतोषयत्. राजा पृथ्वीराजोऽपि स्वप्रजास्तथा कनोजाधिपतिसामंतानसेवत.

अथ कतिपयदिनान्युषित्वा गृहीतस्वदेशगमनानुज्ञो कनोजाधिप स्वदेशमाजगाम.

(३)

इत्थं महता सायासेन महता युद्धेन च कनोजाधिपं विजित्य संयोगितां लब्ध्वा स पृथ्वीराज आत्मानं कृतकृत्यं मन्यमानोऽद्वितीयेन तारुण्यसहायेन संयोगिताया लावण्येन मोहितमतिर्विलासैकसक्तो बभूव. स च कदाचित् प्रभाते स्नात्वा विरचितसंध्योपासनः क्षणमात्रं राजसभां गत्वा राज्यकार्याण्यपश्यत्. संयोगिता तु तावत्कालमपि पतिविरहमसहमाना भूयो भूयो विज्ञप्य राजसभागमनात्तं न्यवर्तयत्. प्रधानामात्याश्च परं विश्वासपात्राणि कृत्स्नमपि राज्यकार्यं सम्यगकुर्वन्. पृथ्वीराजशत्रवस्तु तं विलासनिमग्नं शृण्वन्तोऽपि तत्प्रजाना राजनिष्ठां तदीयं शौर्यं च जानन्तो न किमप्यकुर्वन्. पृथ्वीराजश्च संयोगितया समं तेषु तेषु ऋतुषु नानाविधान्विलासांश्चक्रे.

अचिरादेव मदमत्तकोकिलालापमधुरः, सर्वतः प्रफुल्लकुसुमितानाणितवनलतामोदान्धभ्रमरझंकाररम्यः, मदनबाणैरिव सुतीक्ष्णैरुग्रगन्धैराम्रकोरकैर्व्याप्तानेकसहकारः, चन्दनगन्धवाहितडागजलसंगिमलयवाताहृद्यः, निर्निद्रसुवर्णचंपककलिकाकिंजल्काच्छादितभूविभागः, प्रफुल्लपारिजातकुसुमविरचितभूशय्यः, तारुण्यमदोन्मत्ततरुणीभिरिव कुसुमस्तबकावनम्रमल्लिकालताभिराक्रान्तसकलारामः, सप्रियकरसंचरत्तरुणीगणकृतस्वागतः, मानिनीमानविस्रंसननहाविघ्नः, ऋतुराजो वसंतसमयस्तयोर्विलासे साहाय्यविधित्सयेव समाजगाम.

तावपि शृंगारशास्त्रपारगौ शरीरसंपत्समन्वितौ तारुण्यमदशालिनौ तं समागतं वसन्तसमयं सत्कर्तुं समारभेताम्.

कदाचित् सततनिपतत्परागाच्छादितासु, परभृतालापनादितासु, निर्निद्रचूतकलिकामोदमधुरासु सहकारवीथिषु कृतनिवासौ संगीतकथाभिः, वारांगनानृत्यैः, नानाविधयौवनविलासैरात्मानमरमयताम्.

कदाचित्– अतिचपलासु, नानाविधवर्णरंजितासु, मन्दवातसंगोत्थतरंगचंचलासु नौकासु स्थित्वा परस्परकण्ठगतबाहुपाशौ चिरं मदनशरपीडितयोर्हंसयोर्लीलामपश्यताम्.

अन्यदा तु--सततनिपतत्कुसुमास्तृतभूमिषु वकुलवीथिकासु चंपकलतासंमिश्रासु विरचितकृत्रिमदोलासु स्थितौ सुखमयीः क्रीडाश्चक्राते.

कदाचित्–प्रफुल्लकुसुममयीना, बालपल्लवमधुराणां माधवीलताना निकुञ्जेषु अतिमधुरगन्धचन्दनसिक्तैश्चंपकवकुलसहकाराशोककुसुमैर्विरचितासु पुष्पशय्यासु रतिविलासानकुरुताम्.

एव वसन्तसमयं निर्विशेषमुपभोगेनाहत्य ग्रीष्मसमयं सेवितुमारेभाते.

कदाचित्--अनेकयन्त्रमुक्तैः सुगन्धिजलसेकैरार्द्रीकृते, घनसारचूर्णसिकते, मन्दमन्दवाहिकुल्याजलशीतले, अनेकपल्लवमयलतासमाच्छादिते धारागृहे समारब्धसंगीतौ सुखेन समयमयापयताम्.

कदाचित्–अतिनिर्मलजलासु, कमलसहस्रदुर्ज्ञेयतरुणीमुखचन्द्रासु, हंसमिथुनशब्दमुखरासु, लतानिवारितातपासु गृहदीर्घिकासु सरःसु वा तौ स्नानमिषेण विहरन्तौ चिरमरमेताम्.

कदाचित्--निर्मलचन्द्रिकारमणीयासु, उशीरजवनिकासंगशीतलासु, अगरुचन्दनगन्धिकासु, स्फटिकमणिमयीषु, व्यजनवातशीतलितासु प्रासादवाटिकासु शारदक्रीडाव्यकाते.

ततश्च गर्जद्घनपटलावृतमेघाच्छन्नगगनतलो वर्षासमयोऽपि तौ सेवितुं सामन्त इवाजगाम.

तदानीं तु--कुसुमस्तबकालंकृतानां कदम्बवृक्षाणामधस्तात्, पारिजातवृक्षवीथिकासु, जलभरातिक्रान्तकूलानां सुनदीनां तीरेषु अनवरतजलधारागमनोहरासु कदलीराजिषु चिरं विलेसतुः.

कदाचित्- अत्युन्नतपर्वतशिखराग्रविनिराजप्रासादवातायनेषु स्थितौ प्रबलवातानुप्रसजवघनघटाः. मन्दं मन्दं चपलाविलसितानि, महता वेगेनाधस्तान्निपततो जलप्रवाहान् पश्यन्तौ क्षणमिव सकलं दिवसमगमयताम्

कदाचित्-- जलपरिपूर्णेषु बीजाङ्कुरहरितेषु पंकमयेषु क्षेत्रेषु प्रधावनश्रान्तहरिणमिथुनविहारदर्शनेनात्मानममोदयताम्.

एवं चिरवासं वर्षासमयमभिलक्ष्य संजातवैतृष्ण्यं तं पृथ्वीराजं प्रेक्ष्य नूतना संयोगितायाः सखीव शरत् सेवितुमारभत.

तत्र च-सूक्ष्मनिर्मलसलिलप्रवाहाणां, तीरविराजमानमृदुलपंकानां, काशस्तबकालंकृतोभयतीराणां नदीनां पात्रेषु हंसमिथुनानि वीक्ष्य नितम्बबिम्बानुकारीणि पुलिनजातानि समालोक्य परं रेमाते.

कदाचित्-- अतिनिर्मलगगनधूसरसलिलमण्डितासु, चक्रवाकयुगलचंक्रमणसंजातलहरीषु, गृहदीर्घिकासु स्वयमवतीर्य कृतजलक्षेपविलासौ परमप्रफुल्लानि सहस्रपत्रमंडितानि लक्ष्मीनिवासभवनानीवातिरमणीयानि कमलानि विलूय तन्मालाभिः परस्परमलंकुर्वन्तौ समतुष्यताम्.

कदाचिन्मृगयामिषेण जनसंमर्दं परिहरन्तौ सस्यपरिपाकपिशंगानि, क्वचिद्धरितयावशस्यानलानि क्वचित्संस्कृतभूमिकृष्यानि क्षेत्राणि पश्यन्तौ, स्थाने स्थाने समुत्पन्नानां वन्यलतानां स्वादूनि फलानि भक्षयन्तौ चिरमेकान्तवाससुखमसेवेताम्.

तदानीमेव तं सम्राजं संयोगिनाविलासमग्नमवलोक्य हेमन्तर्तुर्विलासानीविरागच्छत्.

तत्र च-- तुहिनकणमौक्तिकमालालंकृतान् लताभिः स्वकोमलशाखाग्रैराश्लिष्टान् वृक्षान्, हिमानीपीडापरिहारायेव स्वतिरोहितकरजालं सूर्यं, शीतवातकम्पमानगाढाश्लेषतत्परमिथुनगणं, निरीक्ष्य तूलशय्यामये निर्धूमांगारपूर्णलोहपात्रे, अगरुचन्दनधूपधूमचुम्बितविताने, गर्भगृहे चिरमस्वपताम्.

कदाचित्-- अनुदित एव भगवति मरीचिमालिनि, मौक्तिकभस्मस्वादूनि, आमलकरसपाकव्यंजनानि, वातामदाडिमादिपौष्टिकपदार्थरुचिराणि, पक्वान्नानि भुंजानौ, कस्तूरिकाप्रचुरगंधविरचितांगलेपनौ, ऊर्णावस्त्राणि परिधाय पाशक्रीडामकुरुताम्.

कदाचित्-- प्रबलतुहिनान्धकारव्याप्ते, अदृश्यमाननीचोचप्रदेशे, अगणिततुषारकणमौक्तिकराजिसमलंकृतभूप्रदेशे, प्रभाते समु-

नानाविनोदविविधविकिरणापनीतशैत्यौ सर्वत्र पर्यटनेन हेमन्ताभिम व्यनयतां निज सदने

एवं यापयतोर्हेमन्ते शिशिर्तुं शनैस्तं सेवितु प्रचक्रमे.

तत्र तु-- विरलीभवद्धिमकणिके, सुधाकरसमशीतोष्णवाते, कुन्दनिकुञ्जलतापुष्पामोदमधुरे, प्रजववातोत्थापितधूलीपटलधूसरदिगन्ते सायंप्राते ऽपि प्रासादे पर्यटन्तौ हिमकृता जातीलतादुर्दशां विलोक्य खिन्नौ नूतनकिसलयमण्डितान् सहकारान् विलोक्य सममेव सुखदुःखे अन्वभूताम्.

कदाचित्-- प्रबलवातजर्जरीकृतशुष्कपत्रध्वनिभीषणः नयन-पीडाकारिधूलिधूसरव्याप्तदिगन्तः, सकललतावल्लीदलवस्त्रलुण्ठकः, नानावृक्षगणपल्लवाच्छादनापहरणदक्षः शिशिरः कदाचिदतिलावण्यवत्याः प्रियायाः संयोगितायाः स्वस्य च शरीरं पीडयेदिति मत्वा गर्भगृह एव स्थित्वा क्रीडां चक्रतुः.

एवं रात्रिंदिवं विलसतोस्तयोः संयोगितापृथ्वीराजयोर्मनसि स्वराज्यचिंता नैव पदं लेभे. नापि कामवासनाऽशाम्यत्. सा च प्रत्यर्पितघृता वह्निज्वालेव प्रतिदिनं ववृधे. यद्यपि राजनिष्ठाः प्रधानामात्या स्वस्य कार्याणि दाक्षिण्येनाकुर्वंस्तथापि स्वामिनं राज-कार्यविमुखमुपलभ्य कुमार्गगामिनो नीचा जना राजकार्यविघ्नानुत्पाद-यामासुः.

एकस्मिन्दिने मृगयार्थं निर्गतं पृथ्वीराजं निशम्य सर्वे तदीया मृगयासहाया अपि तत्साहाय्यार्थमागच्छन्. अचिरादेवाटविकैः

'अस्यां गुहायां सिंहो वसति' इति तस्मिन् समागते तां वार्तां निशम्य सर्वे मृगयवो महान्तं कोलाहलं कुर्वन्तस्तत्र गताः.. निर्जगाम च ततोऽचिरादेव सिंहचर्मप्रावरणो जटाकलापमण्डितशिराः कोपरक्ततरनयनयुगलो महातापसः स तु नातिगम्भीरो — 'नृपाधम पृथ्वीराज! अहं चात्र निभृतं स्थितस्तीव्रं तपश्चरामि. तुभ्यं च तस्य नवमांशं वितरामि. वृथैव मदान्धेन त्वया मदीया तपस्या विघ्निता. तदचिरादेव त्वदीयः शत्रुस्त्वां बन्दीकृत्य त्वदीये अक्षिणी कानेन विदारयिष्यतीति शशाप.

तमिमं शापं सुलभकोपस्य दुर्वाससः शिष्येण चक्षुःश्रवसा प्रदत्तं निशम्य खिन्नः पृथ्वीराजः स्वयमागत्य तस्य मुनेः पादयोः पपात. दयानिधे! मुनिवर! अज्ञानतः कृतोऽयं दासस्यापराधः क्षन्तव्य इति व्यजिज्ञपच्च. स तु क्रुद्धो मुनिः 'राजन्' न ममायं शापो मृषा भविष्यति. किंतु अद्यामित आरभ्य वर्षादूर्ध्वं भविष्यतीति प्रलपंस्तिरोदधे. राजाऽपि लब्धधैर्यः संयोगितया समं विलासनिमग्नो बभूव. यद्यपि परीक्षिदेव पृथ्वीराजेनावशिष्टे वर्षे देहसाफल्यं कर्तव्यमासीत्तथापि प्रकृतित एव रजोगुणाधिक्येन संयोगितालावण्यलुब्धो न किंचिदपि उचितं चिन्तयामास. प्रत्युत पुनरपि पशुवद्विषयकर्दमासक्तो बभूव.

(४)

एवं विलासपरे दिल्लीश्वरे क्रमेणाधमा जनाः सर्वत्र स्वव्यवसायानारभन्त. शत्रवोऽपि निभृतं गूढचारैर्ज्ञातवृत्तान्तास्तस्य राज्य-

समादरमाप्नुवन्तश्च परोपकारसाक्षिणोऽमात्या परस्परद्वेषपरा अभवन्. सैनिकाश्च स्ववेतनमलभमाना युद्धाभावात्त्रस्ता अन्यनृपाणा सेनां प्राविशन्. महंमदघोरि शाहाबुद्दीनश्च भूयोभूय पृथ्वीराजेन पराजितोऽपि पुनरपि दिल्लीराज्याक्रमणार्थं प्रायतत तदानीं चेमां स्वराज्यस्य दुर्दशां विलोक्य सर्वेऽपि वृद्धा नागरिका मिलित्वा किं कर्तव्यतादिविचारार्थं सभा चक्रु तत्र च मिलितास्ते कृत्स्ना राज्यव्यवस्था विलासमग्नाय राज्ञे पृथ्वीराजाय निवेदयितु चन्दकविं विज्ञापयामासुः.

चन्दकविश्च तेषां राजनिष्ठाना प्रजामुख्याना विज्ञप्तिमाकर्ण्य परं खिन्नो जगाद— नागरिकमुख्या ! यद्यपि युष्मदर्थमहं पृथ्वीराजस्य विलासमंदिरं गत्वा सर्वं वृत्त तस्मै निवेदयिष्यामि तथापि संयोगिताप्रेमपाशबद्ध. स पृथ्वीराजस्तन्न श्रोष्यतीति निश्चितमेव. कथं खलु विषयानुरागकलुषेऽन्तःकरणे कर्तव्यजिज्ञासा प्रादुर्भवेत् ? अयं हि हाहुलीरायः सामन्त॰ पृथ्वीराजस्य परमं मित्रम्. संयोगिताहरणेऽयमेव प्राधान्येन पृथ्वीराजमसहाययत् परन्तु साम्प्रतं विषयलुब्धः स स्वसाहाय्यकारिणमपि न पृच्छति कुतो मां विप्रं ! तथाप्यावां विलासमन्दिर गत्वा यथाशक्ति सर्वं वृत्त निवेदयितुं प्रयतावहे इति.

अथ चन्दकवि समं हाहुलीरायेण विलासमन्दिरद्वारं गत्वा दासीना मुख्याया दास्या हस्ते इदं पत्रं ददौ. —

राजन्विलासमग्नस्त्व । गौरांग्या राजकन्यया ॥
इतो महंमदः शत्रुः । तव राज्यं जिघृक्षति ॥ १ ॥

सा तु दासी क्रमेणागच्छन्ती तेन दासीनां गणानुसरणं राज मन्दिर तत् पत्र निक्षेप. तस्मिन् समये राजा पृथ्वीपतिरन्तर्मना अभूत् तदानीमेव तत्र कुशाग्रमत्या संयोगितया पठित्वा पत्रं रोषेण सा राजानं जगाद--- नाथ! कृष्णा पापी. युष्मान् मम मत् निन्दाम- कारिणो वीक्ष्यासूययति. अनेकजन्मसंपादिते सुकृतेऽस्मनयोश्चरण- योर्दास्यभवम्. साम्प्रतमपि यदि न मनोरथं सफलयिष्यामि तदाऽहम- भाग्या स्याम्. तस्मादिदं चूर्णीकृत्य वह्नौ निक्षिपामि इति राजा च प्रेमणमतिर्न किमपि प्रत्युवाच. प्रत्युत सलीलं जहास. तेन च समु- त्तेजिता राज्ञी संयोगिता सर्वा अपि स्वदासी' 'येनेदं पत्रमानीत यश्च तस्य साहाय्यकारी तावुभावपि वेत्रैः पृष्ठे ताडयत. येन भीतोऽन्य कोपीदृशं पत्रं नानयेदित्यशात राज्ञ्या इमामाज्ञां कर्णेकृत्वा सर्वा- अपि संयोगितादास्यो वेत्रहस्ताः स्वामिन्या नियोगमनुष्ठातुमहमहमि- कयाऽधावन्.

तौ च चन्दकविहाहूलीरायौ महतौत्सुक्येन राजाज्ञाश्रवणे सोत्कण्ठौ महता वेगेनागच्छन्तं दासीगणं वीक्ष्य समुल्लसमभवताम्. तदानीमेव तयोः पृष्ठयोर्वेत्राघाता समापतन्. तौ तु कारणम- विज्ञाय संभ्रान्तौ मुहुर्तं निश्चलमतिष्ठताम् यद्यपि तासां दासीनां शासने पर्याप्तबलौ तौ तथाप्यबलानामुपरि हस्तक्षेपो वीराणां नोचित इति मन्वानौ कथमपि राजद्वारकपाटे पृष्ठाभ्यां धृत्वा वेत्राघातान् पर्यहरन्. अत्रान्तरे स्वदासीप्रतापस्य तथा स्वशत्रुशासनदुःखस्य दिदृक्षया तत्रैव पृथ्वीराजेन समं संयोगिता समाजगाम. सा च

न मा [illegible]ऽस्माद् [illegible] [illegible] [illegible] न [illegible]
ब्राह्मणस्तद्रूपं गृहीत्वा [illegible] [illegible] [illegible] न [illegible]-
कथयत्. ततश्च [illegible] मम गृहवार्ता [illegible] न [illegible]
धणात्स गृहकार्याणि [illegible] कृत्वा [illegible] [illegible]
तस्मिन् [illegible] कविराजस्य चन्दबरदिन [illegible] [illegible]
श्रीद्रोणगिरिनाथ [illegible] [illegible] पृथ्वीराज[illegible] [illegible]. [illegible]
निपुणं चन्दबरदिनमपि [illegible]. पितापि. [illegible]
[illegible] पराक्रमानुरागं पुरा[illegible]. [illegible]
पृथ्वीराज [illegible]--(१, २, १५) परिशिष्ट [illegible].

(३)

अथ राजाऽनङ्गपाल [illegible] [illegible] [illegible]
[illegible] [illegible] परम[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible]

[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] ॥
[illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] ॥ १ ॥

[illegible]

वेत्राघातपरिहाराय पृष्ठेन कपाटं धृत्वावस्थितौ स्वदासीगणपरिवेष्टितौ चन्दकविहाहुलीरायौ वीक्ष्यैव जहास.

तस्मिन्नेव क्षणे क्रोधरक्तनयनकमलः स क्षत्रियश्रेष्ठस्तं हासं कर्णेकृत्वाऽऽत्मानमपमानितं मन्वानो विधूय तत्कपाटं तासां दासीनां पुरतस्तयो. अवदच्च — दास्य ' कृत्स्नमपि युष्मत्कर्मावशिष्यया राजप्रीत्या सोढं. साम्प्रतं तु सा समूलं नष्टा. तद्यदि या खलु दासी यमालयं द्रष्टुमिच्छेत्तयैव वेत्राघातं करणीय इति. तस्य तदुग्रभाषणं निशम्य सर्वा अपि दास्य पलायिताः स्वस्वस्थानं जग्मुः. दासीषु च निवृत्तासु कोपातिरेकप्रस्फुरदधरोष्ठः स चन्दकविमाह— कविश्रेष्ठ ' एतावत्कालपर्यन्तं कृतायाः सेवाया इदं पारितोषिकं पृथ्वीराजेन वितीर्णं. एतावावा संयोगितया सम्यक् सत्कृतौ. अयं हि संयोगितायाः लोभेनात्मानं धन्यं मन्यमानः सर्वानपि नौ दीनान् मन्यते. एषा संयोगिताऽपि न क्षुद्रान्मन्यमाना दासीहस्तेन ताडयति. तद्यावदिमां मदोन्मत्तां संयोगितां वैधव्यपङ्कमग्नां न करिष्यामि तावत्पर्यन्तमहमस्मिन्दिल्लीनगरे जलं न पास्यामि. भ्रातः! चन्दकवे! किं ते रोचते' इति. चन्दकविस्तु प्रथमं तु हाहुलीरायस्येदं भाषणं निशम्य खिन्नोऽवदत्–हाहुलीराय ' त्वदीयाः सर्वे पितरो निर्व्याजं स्वस्वामिचरणाराधनपराः स्वर्गमगच्छन्. तेषामेव कुले जनित्वा किमिदमसदृशं जल्पसि! कदाचिदनवधानः स्वामी सेवकान्पीडयतीति सेवकैः क्रोधात् स्वाम्येव हन्तव्य ! [illegible] पापात्मा [illegible] करोति भो रीति किं नोरेव हन्तव्या. तात! हाहुलीराय! त्वं कोप-

कलुषितमना पापमाचरन् मा भूत् अयमपि न स्वामी शीघ्रमेव प्रकृतिस्थो भविष्यतीति

हाहुलीरायश्च रजोगुणविकासशाली वयं हि खलु वन्दिनः मानापमानयोः कथैव भवद्भिर्न ज्ञायते. यथाकथंचिद्राजस्तुतिः करणीया. रुचिराणि पक्वान्नानि भोक्तव्यानि. एवं च वनं कालं यापयन्तः कथं मानापमानवार्तां जानीथ. तिरस्कृतः श्वाऽपि न पुनस्तं सेवते किमुत मानवनो मानवः? तत्तिष्ठत यूयमस्य मदमत्तस्य राज्ञोऽपमानपरितोषिकाणि गृह्णन्तः? अहं चेतो गत्वा गिझनीपतिं शहाबुद्दीनमाहूय पृथ्वीराजं वन्दिनं कृत्वा संयोगितागर्वमपनेष्यामि इति वदन्नेव प्रजवमश्वमारुह्य गिझनीनगरमभिलक्ष्यागात्

(५)

भीष्मप्रतिज्ञं हाहुलीरायं कोपकलुषं यवनराजमानेतुं गतं निशम्य सर्वेऽपि दिल्लीनगरवासिनो जना अत्यन्तं चिन्तातुरा अभवन्. ये खलु प्रधानामात्या राज्यकार्यभारधुरंधरा आसन्तेऽपि अपमानभिया सर्वं वृत्तं निवेदयितुं राज्ञे नाशकन्. ये च धनिका आसन्ते स्वधनरक्षणचिन्तामग्नाः शनैः शनैर्नगरादपासरन्. ये खलु कुलीनास्ते स्वशीलरक्षणाय स्वकान्ताः कन्यकाश्चान्यत्रप्रैषयन्. ये च धार्मिकास्ते राजसंकटपरिहाराय नानाविधान् धार्मिकानुपायानातिष्ठन्त.

हाहुलीरायश्च सकोपं दिल्लीनगरान्निर्गतो गिझनीनगरमागत्य तदाधिपं शहाबुद्दीनमपश्यत्. तेन कृतसत्कारस्तमुवाच राजन्? एष

हि उचितोऽवसरो दिल्लीनगराक्रमणस्य. यतो पृथ्वीराज संयोगिताविलासमग्नो न किंचिदपि राजकार्यं पश्यति प्रत्युत सर्वानपि सामन्तानपमानयति. यो हि भीष्म इव प्रतापशाली चामुण्डराय सोऽधुना बन्दीकृत शस्त्रं त्यक्त्वा तूष्णीं तिष्ठति. बृहस्पतिरिव बुद्धिमत्कयमासामात्यस्तु स्वयमेव तेन निहतः. अवशिष्टा शूराश्च संयोगिताहरणसमये समराङ्गणे पतिताः. तदिदानीमेव सत्वरं दिल्लीनगरमाक्रम्य चिरमभिलषितं सफलीकरोरिति.

धूर्तः शहाबुद्दीनो हाहुलीरायं शत्रुपक्ष्य जानन्न सहसा तस्मिन् स्वदेशस्थे प्रेषयामास च स्वविश्वासपात्रं कञ्चन सामन्तं पृथ्वीराजराज्यस्थितिनिरीक्षणाय. सोऽपि गत्वा हाहुलीरायकथितं सर्वं प्रत्यक्षीकृत्य प्रतिनिवृत्त्य स्वस्वामिने सर्वं वृत्तान्तं न्यवेदयत्. शहाबुद्दीनश्च तं श्रुत्वा संतुष्टश्चिरवाञ्छितं मनोरथं पूरयितुमुत्सुकः स्वसेनां समनह्यत्. क्रमेण दिल्लीनगराक्रमणाय स्वराजधान्याः सकाशात् प्रतस्थे च.

[illegible]

[illegible]

नगरमाक्रम्य [illegible] बन्दिनं कुर्यात् [illegible] तदय-मवसर एव बोधनीय इति. विचार्य च [illegible] मन्तःपुरप्रवेशोचितं सेवकमाहूयावदत्—त्वं [illegible] संयोगिताविलासमन्दिरं प्रविश्यैकाकिनः पृथ्वीराजस्य [illegible] क्षिपेति. तच्च पत्रमित्थम्.

पृथ्वीराज! क्षत्रियश्रेष्ठ! सर्वत्र संचरतां दूतानां मुखेभ्यो दिल्लीनगराक्रमणाय समागच्छन्तं शहाबुद्दीनमवगम्य तव साहाय्य-विधानायानाहूतोऽपि समागत्य तिष्ठामि. अत्रागत्य तिष्ठतो मे दश दिनानि संवृत्तानि. तथापि मदागमनं न जानाति भवान्. यदि तादृशो मित्रस्येयमवस्था तदा गुप्तमागच्छतः शत्रुसैन्यस्य वार्तां कथं जानीयात्. त्वां हि विषयासक्तमविभावितराजकार्यं प्रभुमयोग्यं

मन्वानाः प्रजास्त्यक्त्वाऽन्यत्र गच्छन्ति. संयोगितापि लावण्यवती तारुण्यसम्पन्ना स्यान्नाम तथापि विषयोपभोगस्तदासक्तिश्च न नः क्षत्रियाणां प्रधानं कर्म. क्षत्रियजातिः खलु दीनानां पालनाय धर्मरक्षणायाऽस्मिञ्जगति भगवता परमात्मना निर्मितेति सर्वाणि शास्त्राणि वदन्ति. यद्यपि सन्ति नाम धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्थास्तथापि धर्मादीनां त्रयाणामविरोधेन सेव्यमानः कामः पुरुषार्थतां भजते न विरोधेन. अन्यथा कामासक्ताः पशवोऽपि पुरुषार्थकारिणः स्युः. तद्विरमास्मादनर्थकारिणः कामोपभोगात्. पश्य च दीनानां प्रजानां दुर्दशां. एष केवलं कृतान्त इव सत्वरमागच्छति तव राज्यमपहर्तुं यवनाधिपः. तत्सन्नाहय सेनां. न खलु तव पूर्वजास्त्वमिव विषयपङ्के लुठन्तः पार्वणचन्द्रधवलां कीर्तिं संपादयामासु. तद्विषयोपभोगलालसां विहाय सत्वरमागत्य कर्तव्यं विचारयेति.

स तु स्वामिभक्तश्चतुरः सेवकोऽन्तःपुरनीतिं सम्यक् जानन् दासी नाम भूत्वा संयोगिताविलासमन्दिरमविशत्. क्रमेण परमचातुर्येण संयोगितायाः प्रिया दासी बभूव. एकस्मिन्दिने पाटलीपुष्पपरिमलामोदिते निर्मले जले चिरं विहृत्य तौ श्रान्तौ शुकरंगासंवादं शृण्वन्तौ द्रोण्यामतिष्ठताम्. अत्रान्तरे प्रकृष्टशीतमसहमाना संयोगिता ततो निर्गत्य वस्त्रान्तरं परिधातुं स्वविलासमन्दिरं जगाम. पृथ्वीराजश्च सुखेन शीतं सहमानस्तत्रैव तस्थौ. तदानीमेव सा चतुरा दूती तत्पत्रं पृथ्वीराजसंनिधावक्षिपत् अवदच्च–स्वामिन्! इदानीमेवैतो महता वेगेन धावतः शुकस्य मुखाद्गलितमिदं पत्रमिति. पृथ्वीराजो-

[illegible] मय [illegible] [illegible] [illegible] नावन् सर्वेन्द्र [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] पर्णि- [illegible] [illegible] [illegible] [illegible] मनुवाच्य [illegible] [illegible] [illegible] [illegible] निषयकर्दने लुठता [illegible] कर्तव्यमेव न कुर्वन् [illegible] [illegible] विमर्नी कृता . मदीये पितृपितामह पुरन्दर [illegible] [illegible] [illegible] मदीय [illegible] [illegible] [illegible] [illegible] [illegible] मदीय वृत्त पश्यन्तः स्वभुक्तेन [illegible] [illegible] [illegible] मदीया पूर्वजा. किं मा वदन्ति [illegible] [illegible] द्वितीय हृदयमिव मे सुहृत् समरसिंहो मदीय [illegible] [illegible] [illegible] दूरे दशदिनपर्यन्त निष्ठति, [illegible] [illegible] न जानाति . विदूना निश्वमामिन. विषयविषप्रमोदमूढमनिरह स्वकर्तव्यमपि व्यस्मरम्. तदिदानीमेवाह मौलान् प्रधानान त्यानाहूय चिरोद्वेगेऽपि सत्कर्तुं प्रयतिष्ये. ततस्तद- नुमत्याऽन्यत्र गतान प्रजाजनानान्यस्य तान् स्वस्थानापन्नान्विधाय मदोन्मत्त न भूयोऽपि पराभृत यवनराज समूलमुन्मूलयिष्यामीति

एव विचिन्तयत्येव मति राजनि सकलालङ्कारालङ्कृतशरीरा संयोगिता सविधमागत्य-नाथ ' किं न सुखयति एष प्राभातिको मलयवात ? किमद्य न स्पृहयसि गण्डूषजल मदगे त्यक्तुं ? किं नोत्सहसे परिहासैर्मा तोषयितुं ? किमिति अगाधचिन्तामग्नो लिखित- इवाभासि ' प्राणनाथ ? केन पापिनाऽसौ मम विहार कलुषीकृत.? किमिति प्रतिदिनमिवाद्य हृदयग्राहिभिः प्रेमरसमयैर्भाषणैर्नानुगृह्णासि

त्या ! एतावत्कालपर्यन्तं यदभूत्तत्सर्वमपि विस्मृत्यातः परं किंकर्तव्यं तद्विचार्यताम् अहं हि मन्ये—प्रथमतः सर्वेभ्यः प्रजाजनेभ्यो विश्वासोत्पादनाय सर्वेषां नागरिकाणां महती सभा करणीया. तत्र मदीयमकृत्रिमं मित्रं चित्तोडाधिपः समरसिंहः सत्करणीयः. ततस्तत्रैव कर्तव्यविचारणाऽपि कार्येति. तदेतद्यदि भवतामनुमतं तदा शीघ्रमेव भविष्यत्सभावृत्तं सर्वत्र घोषकैर्घोषयत. अहं च प्रमत्तः सभासमयं प्रतिपालयस्तिष्ठामीति.

ते चाकस्मादेव पृथ्वीराजस्य कर्तव्यदक्षतां विलोक्य विस्मिताः प्रतिहततर्कास्तथैव सर्वमकुर्वन् पृथ्वीराजश्च कतिपयसामन्तसमन्वितः प्रजवमश्वमारुह्य स्वयमेव समरसिंहस्य स्कंधावारमगच्छत्. तत्र द्वारपालनिवेदितागमनः सत्वरमग्रे पादाभ्यां गत्वा तं राजर्षिं कर्तव्यदक्षं धर्मशीलं समरसिंहं गाढमाश्लिषत् सोऽपि च परं विस्मितस्तं पृथ्वीराजं विषयलालसापिशाचिकामुक्तं पुनर्जातं मन्वान ईश्वरं मनसैवास्तौत्. निजगाद च—वयस्य ! पृथ्वीराज ! अद्यापि भारतवर्षस्य भागधेयं समीचीनमेवास्ति. अद्यापि रजपूतरमणीनां पातिव्रत्याग्निर्न शान्तः, नापि धर्मशीलानां मुनीनां तपांसि नष्टानि. यतो विषयसागरतलमग्नो भवान् स्वकर्तव्यविधानाय पुनरपि पूर्ववदवस्थितः. पृथ्वीराज ! त्वादृशस्य पुरुषपुंगवस्य यद्योग्यं तदेव कुरु. अन्यथा कीटका अपि विलासोपभोगान् कुर्वन्तः किं न स्तुत्यर्हाः ! अधुना चास्माभिरप्रमत्तैः सम्यक् सेनां सन्नाह्य व्यूहरचना कार्या. इदानीमेवागतो मदीयश्चारः समीपमागतं शत्रुं निवेदयतीति. पृथ्वीराजोऽपि तदीयमिममुपदेशममृतमेव मन्वानः सत्यत्वेन जग्राह.

पृथ्वीराजोऽपि मातामहस्येन्द्रप्रस्थाधीश्वरस्यानंगपालस्याज्ञा शिरसांऽगीकुर्वाण· सर्व हस्तिनापुरराज्यं स्वीचकार. राजाऽनंगपालोऽपि योग्यपुरुषे निहितराज्यभारतया निश्चिन्तो बदरिकाश्रमं तपस्तप्तुं प्रययौ. स्वपितामहेन कृत्स्नं राज्यं पृथ्वीराजायैव समर्पितमवेक्ष्य नितान्तं क्रुद्ध कनोजाधिपतिरनंगपालस्य कनिष्ठकन्यापुत्रो जयचंद पृथ्वीराजाय परमद्रुह्यत्. प्रकाशमब्रवीच्च—मातामहेनानंगपालेन कृत्स्नं राज्य पृथ्वीराजायैव समर्पितमेतन्न सम्यक् कृतं. अहमपि ह्यनगपालस्य दौहित्र ! यथाऽनगपालस्य पृथ्वीराज प्रियस्तथाऽहमपि. शरीरसंबंधतश्च समानावेवावाम्. तस्मादनंगपालस्य राज्येऽर्धो मदीयोंऽशोऽस्त्येवेति.

वाचका ! यद्यपि राज्ञाऽनंगपालेन यत्कृतं तत्साध्वेव शास्त्रविहितं च. यतः सर्वाण्यपि शास्त्राणि पुत्रेषु ज्येष्ठपुत्रस्य राज्यभोगित्व वदन्ति. तदभावे न्यायत एव ज्येष्ठकन्यायाश्च तनयस्तदंशभागिति वदन्ति. तथापि राजनीतौ न्याय्यान्याय्यविचारस्तावदेव जायते यावदुभावपि पक्षौ समबलौ स्याताम्. यदा त्वेक पक्षोऽधिकबलोऽन्यश्च हीनबलस्तदा सर्वं न्याय्यान्याय्यविचारं विहाय सबलो हीनबलं नाशयत्येव. सज्जना ? किमर्थमित्थं दूरान्वेषणा. ये खलु राजान इह जगति नानाविधान्नियमान्विधाय जनान् पालयन्ति तेऽपि परराज्यापहारार्थं रात्रिंदिवं प्रयतन्ते. यदि कश्चन चौरो रात्रौ निभृत कस्यापि गृह प्रविश्य तद्द्रव्यमपहरति ज्ञायते च स तत्कर्मकारी राजपुरुषैस्तदा स कारागारे स्थाप्यते. परन्त्विमे राजान सुव्यवस्थिता सेना गृहीत्वा यदा सर्वजनाना समक्षं परराज्यान्याक्रम्य तत्स्थ जनानां

वृत्तकुशलप्रश्नः सायं सभागमनार्थं चित्तौडाधिपमामन्त्र्य पृथ्वीराजः स्वनिवासं प्रत्यागच्छत्.

अचिरादेव च भोभोः सभ्या नागरिकाः ! युष्मत्स्वामी पृथ्वीराजो युष्मानाज्ञापयति-एष सप्तकृत्वः पराजितः शहाबुद्दीननामा यवनराजः पुनरपि योद्धुमागच्छति अस्मदीयाश्च केचन तस्य सहायाः. तत्साम्प्रतं किं विधेयमिति विचारयितुं सायंकाले महती सभा क्रियते. तदर्थं च सर्वैरपि भवद्भिरागन्तव्यमिति.

निशम्य चेमां घोषणां सर्वेऽपि नागरिका आश्चर्यमग्ना आनन्दोल्लसद्हृदयाः प्रफुल्लाहवो विहितदिनकृत्यास्ते सभासमयं प्रतिपालयामासुः. अचिरादेव चानन्दवन्दिजनकृतकीर्तिः सकल-सामन्तचक्रवालमध्यवर्ती तारागणमध्यगतो विधुरिव [illegible] दन्तिस्कन्धागतः पृथ्वीराजः स्वनिवासप्रासादान्निर्गत्य सर्वेषां प्रजाजनानां प्रणामान् गृह्णन् क्रमेण सभास्थानमाजगाम. तदानीं समरसिंहोऽपि सभामागतस्तेन पृथ्वीराजेन समं सिंहासने समुपाविशत्. तौ च महाप्रसन्नौ [illegible] [illegible] दिल्लीनगरस्थाः [illegible] आनन्देन सिंहनादान् [illegible]. पृथ्वीराजोऽपि स्वयं समरसिंहस्य [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तेन च महान् [illegible]

(३)

एवं महोत्सवव्यग्रतया गच्छति कालेऽन्ये प्रचलिते सति राजप्रासादस्य मध्यचतुष्कवर्तिनी महती शिला द्विधाऽभवत् तस्याः जटाभारधारी, रुद्राक्षमालाधारी, रक्तनयनः, हस्ताग्रेविलसत्करालनग्नखड्ग, नरकपालसुपिहितद्वितीयहस्त, भस्मस्नानशोभिताङ्गो वीरभद्र आविर्बभूव.

तं च भयंकरस्वरूपं वीक्ष्य पृथ्वीराज साष्टांगं प्रणिपपात. परन्तु स न पृथ्वीराजं किंचिदप्यभाषत. ततः शिवभक्त समरसिंहस्तमनमत् स्वीकृत्य च तदभिवादनं तूष्णींस्थितं च वीरभद्रं देवाकारशाली चन्दकवि 'अस्ति कश्चन विशेषः' इत्यपृच्छत्. तदानीमेव स घोषेण उच्चैः-अहमस्मि वीरभद्र. परमेश्वरेण महाशिवेन दक्षयज्ञविध्वंसार्थमुत्पादितः तं च तत्र स्वसमाप्य कृतकृत्यः सदाशिवात् 'यो हि तव निद्रां भेत्स्यति तस्य कुलक्षयो भविष्यति' इति वरं लब्ध्वाऽत्र सुखेनाऽशयम्. प्राभातिकवाद्यकोलाहलेन मम निद्रा भिन्ना. तेन च तव राज्यं नश्यति नैतावदेव किन्तु तव कुलक्षयोऽपि भविष्यति. योऽस्य महादुर्दिनो यवनेन्द्र राज्यमपहर्तुमागच्छति स च विजयीभूय त्वां बन्दिनं करिष्यति. ततः स तुरुष्कदेशं [illegible] गजा नाम [illegible] [illegible] [illegible] [illegible] एव [illegible] [illegible] भविष्यति इति

इम भाविनमनर्थं वीरभद्रमुखान्निशम्य सजातदु खः स पृथ्वीराज स्वप्रजाना दु.खं भविष्यतीति मनसि कुर्वन्नश्रूण्य-मुञ्चत् तमश्रूणि मुचन्त वीक्ष्य वीरभद्र सहासमाह—राजन्' अद्यावधि ये खलु रामचन्द्रादय· परमात्मावताररूपा राजान सवृत्तास्तेपु कस्य हस्ते खलु इय पृथिवी नियमेन स्थिता ? न कस्यापीति प्रत्यक्ष ! तदवश्य भाविन्यर्थे दु खविधानमनुचित. मानवो हि क्षणिकान्विपयान् नित्यान् मत्वानस्तेपा क्षये वृथा शोचति. स शोक एव मानवस्यायुर्न्यूनी करोति. तद्विरमास्मादकार णदु:खकरणात्. एषा हि जगतो रीतिः यदेकस्य विषयस्यापहारे यस्य स विपय. स शोचति येन च लब्धः स मोदते तस्मादु-दासीना एव विद्वासोऽस्मिन्विपये इति. उक्त्वा चेत्थ स वीरभद्रस्ति-रोदधे राजा च खिन्न स्वमन्दिरमगात्. सर्वेऽपि प्रजाजनास्तस्य वृत्तस्य श्रवणेनात्यन्त दु खाकुला बालका इव भुवि निपत्य रुरुदु.. अन्ये धनिकाश्च स्वधनस्य रक्षणाय नानाविधानुपायानुपायुञ्जत. कुलीना जना स्वस्त्रीणा तथा भगिनीना शीलरक्षणाय स्थलान्तरमकुर्वन्.

एव व्यग्रेपु सकलनागरिकेपु अस्वस्थचित्त पृथ्वीराज पर दु खाकुल: शयनमदिरं प्रविवेश. तत्र च प्राणप्रिया स्वसंकटम्लान-कमलमुखीं चिन्ताक्रान्ता संयोगितामवेक्ष्य दु खितमना सहसाऽऽश्लि-ष्य सलील जगाद. प्रिये ! अवश्य भाविनो भावा भवन्त्येव तत्र नास्ति मानवस्य प्रतीकारसामर्थ्य न खल्वस्मिन् मर्त्यलोके कश्चन चिरजीवी नापि सर्वदा सुखोपभोगी. ये खलु भगवन्महात्मा नीति-

मूर्तयो नलादय आसन्तेऽपि समये प्राप्तेऽपाराणि दुःखान्यनुबभूवुः. तदा न क्षुद्राणां का कथा. तस्मादगणयित्वेदं यावच्छक्ति सत्कर्माचरणीयमेव फलं तु दैवाधीनमिति.

साऽपि सती तदीयमिदं भाषणं निशम्य शान्तोद्वेगा सुखेन सुष्वाप. अचिरादेव च निचोत्तमभावगहिता भगवती सुषुप्तिस्तामात्मवशा चक्रे. पृथ्वीराजस्तु नानाविधकल्पनाभिः संतप्तमस्तको न चिरादपि निद्रां लेभे. ततश्च प्राभातिकेनानिलेन शिरसि स्पृष्टः स्वल्पां निद्रां लेभे.

तदानीमेव भयंकरं स्वप्नं वीक्ष्य भीतः साक्रोशं जागरितस्स पृथ्वीराजः. तस्य च महताऽऽक्रोशेन प्रथमं प्रबुद्धा सती संयोगिता तं जागरयति स्म. तं चाश्रुपूर्णनयनं शुष्कवदनं घर्मकणाक्लिन्नगात्रं भीतमिव सर्वतः कातरभावेन पश्यन्तं स्वकान्तं पश्यन्ती संयोगिताऽपृच्छत् नाथ! किमिति त्वमुच्चैराक्रोश? कुतोऽद्य त्वमाकुलोऽसि? इति. सोऽपि चेदानीं लब्धस्वास्थ्यः शनैःशनैरब्रवीत्-प्रिये! अद्य खलु मया महान् भयंकरः स्वप्नो दृष्टः. स चेत्थम् अहं च त्वया सह कुत्रचित् महारण्ये समुपविष्टोऽतिसुन्दरीं नदीमपश्यम्. सा च महार्णवं किंचित्काले त्वया सह मज्जन्ती तस्थौ. अत्रान्तरे संचारी पर्वत इव स्थूलवपुः कृष्णः [illegible] सा [illegible] सुन्दरी [illegible] नेयं [illegible] इति

अभ्यागमन्. तेन गोजटेण शिल्पेन न यानि कानिचिन्नगरे तस्य परकीयस्य प्रवेशं सर्वथा न्यषेधयन् एवं नगरमध्ये निर्मितसभो-जनार्थं महान्तं भाण्डागारमकरोत् अन्येन गणनातीतका नस्तुना सर्वाण्यपि क्रीडास्थानानि सैनिकनिवासार्थं कल्पयामास. ये खलु नटादयः सकललोकचित्तरञ्जका तान् अस्मान्नगराद्बहिर्निष्कास-यामास. याश्च वारयोषितस्ता अपि. रात्रिंदिवं नूतनस्य शूरेभ्यो युद्धकलाशिक्षणं ददौ. ये खलु महान्तो जलयन्त्रा आसन्तान् शत्रुपक्षस्य कश्चन गूढचारो मा दूषयेदिति तत्रापि निरीक्षकान् स्थापयामास. सर्वेभ्यश्च नागरिकेभ्यो धान्यस्य व्ययं मितं विधातु समुपादिदेश. स्वयं चाश्वमारुह्य सर्वाण्यपि मर्मस्थानान्यपश्यत्.

ततश्च भीष्ममिव सत्यप्रतिज्ञ, द्रोणमिव शस्त्रास्त्रविद्याकुशल भीममिव महाबलं, अर्जुनमिवामोघबाण. श्याल चामुण्डराय प्रणि-पत्य जगाद. तात ! चामुण्डराय ! मया च महदपराद्ध दुष्टजनो-क्तिविपमगरलदूषितमतिना मया न किंचिदपि विचारित त्वं च बन्दिशालाया स्थापितो महत क्लेशाननुभावितोऽसि. तदेतत्सर्व शल्य मिव मां पीडयति धन्यस्त्व. यतो मदीयैरीदृशैर्दुर्वर्तनै. पीडितोऽपि न हाहुलीरायवन्मन्नाशार्थमचेष्टथाः. नापि मदीयशत्रूणा सहायोऽभू क्षत्रियश्रेष्ठ ! चामुण्डराय ! एष समयो भयकर इवाभाति, तदव-शिष्ट कोप विहाय साहाय्यं कुरु एताश्च कन्यका यवनैराक्रांता. प्राणांस्त्यक्ष्यन्ति. तव भगिनी तत्पुत्रो रेणसी मा विहाय न स्थास्यत . तत्त्वा शिरसा प्रसादयामि अस्मिन् युद्धे साहाय्यं विधातुमिति.

सैन्यं गृहीत्वा म्लेच्छे [illegible] नगरं प्रति[illegible]. दुर्जनाः [illegible] नोऽद्य [illegible] [illegible]ऽपि प्रस्तो भवेत. [illegible] महति प्रत्यये सर्वेऽपि सामन्ता [illegible] आगमिष्यन्ति. सप्तमे दिवसे शुभे मुहूर्ते राजपुरद्वारेण [illegible]. तस्मिन् समये गजपटह[illegible]निर्घोषाणि [illegible] इति.

इदं च तद्भाषणं निशम्य मन्त्रिणः सर्वेऽनुमोदन्तेस्म. राजा च सभां विसर्जयित्वाऽन्या अपि पत्नीर्विहाय प्राणप्रियायाः संयोगितायाः मंदिरमाजगाम. संयोगिता च क्षत्रियकन्यकाऽपि स्वप्राणप्रियस्य युद्धार्थं प्रयाणमवलोक्य नितान्तं तु व्याकुला बभूव. सा च कुतश्चिदपि कारणादिदं पतिदर्शनं चरममेव मन्वानाऽत्मानमधन्यमशोचत्. तथापि सती सा प्रभाते प्रयास्यन्तं सकलगुणमण्डितं सम्राजं पतिं रात्रौ नानाविधैर्विलासैः सिषेवे. प्रथमतः सा तदर्थं नानाविधानि सुरुचिराणि पक्वान्नानि स्वहस्तेन निर्माय तमभोजयत्. पृथ्वीराजोऽपि स्वप्राणप्रियायाः संयोगितायाः परिश्रमं सफलीकर्तुमिच्छु. पर्याप्तमभुंक्त. भुक्तवते तस्मै हस्तप्रक्षालनार्थं पाटलीपुष्पजलं वितीर्य स्वयंविरचितां ताम्बूलवीटिकां ददौ. स्वयमपि किंचिद्भुक्त्वा तत्सेवार्थं शीघ्रमेवागच्छत्.

अतिकोमलाभ्यां स्वहस्तकमलाभ्यां तस्य पादाम्बुजे मर्दयन्तीं खिन्नवदनां संयोगितां स्वसमीपमाकृष्य तदधरामृतं पिबन् जगाद पृथ्वीराजः—कान्ते ! इदं तेऽमृतादपि मधुरं देवानामपि दुर्लभमध-

अवदच्च–प्रिये ! त्वमसि क्षत्रियकन्यका. न केवलं वीरसुता किंतु वीरपत्न्यपि. तद्विहाय शोकमानन्देन युद्धगमनार्थमनुमोदस्व. नह्यस्मिन्समये वीरांगना इतरवदश्रूणि मुंचन्ति किंतु स्वपतीन् मधुरैर्भाषणैरुत्तेजयन्ति. तदुत्तिष्ठ. त्वं हि यशस्विनी आराध्यदेवता. त्वं हि मे स्वामिनी. त्वमेव मे राज्यलक्ष्मीः. त्वया प्रदत्तेन खड्गेनाहमवश्यं यशस्वी भविष्यामि. तदुत्थाय मदीयं खड्गं मदीयपट्टबन्धे स्थापयेति.

पृथ्वीराजस्येदं भाषणं निशम्य साऽपि क्षत्रियकन्यका सत्वरमुत्थाय स्मेरमुखी स्वहस्तेन खड्गलतिकामादाय तदीये पटबन्धे ऽबध्नात्. अभाषत च-प्राणनाथ ! यद्यप्यहमस्मि वीरकन्या वीरपत्नी च तथापि अद्यापि अपक्वबुद्धिः संसारविषयोपभोगेऽवितृष्णा नाथं युद्धार्थं प्रस्थितमवलोक्य प्रेम्णाऽनिष्टमाशंकमाना किंचिदस्वस्थचित्ताऽभवम्. वस्तुतस्तु सांसारिकविषयोपभोगेन न पुरुषार्थः सेत्स्यति. तांश्च यथाशक्ति पश्वादयोऽपि सेवन्त एव. अस्मिन् मृत्युलोके बलप्रधाना क्षत्रियजातिः केवलं पशुवद्यथेच्छं विषयभोगायैव न निर्मिता किंतु न्यायेन प्रजापालनार्थं. एते च दैत्या इव मदान्धा यवनाः दुर्बलान् पीडयित्वा स्वविषयवासनां पूरयन्ति. तत्तेषां दण्ड आवश्यकः. एतादृशपवित्रकार्यार्थं मे पतिर्गच्छति. तत्प्राणनाथ! इदं पवित्रं कार्यं सम्यगनुष्ठेयं. तत्र च स्वर्गगमनं श्रेयो न पुनरननुष्ठीय वाऽकीर्तिमधिगम्य वा प्रत्यागमनं. तस्मिन् समये मदीया चिन्ता न कार्या. या खलु युष्मदीयैः परमपवित्रैर्गुणैराकृष्टा पितरमपि

वितं स्वातंत्र्यमपहरन्ति तदा नैकोऽपि विद्वान् नैकमपि शास्त्रमेतां-श्चौरत्वेन व्यपदिशति. प्रत्युत प्रतापशालित्वेन तान् स्तुवन्ति. महाभागा:! इदं सर्व राजनीतिस्वरूप क्षणभंगुरं वारांगनाप्रेमसमं वीक्ष्य निर्विण्णा सज्जना विशेषतो राजनीतौ न्याय्यान्याय्यविचारचर्चाया-मुदासते. अस्तु. प्रकृतमनुसराम . स च जयचन्दो बलाढ्यो रात्रिं-दिवं पृथ्वीराजनाशाय प्रयतमान. स्वसेनादिकं वर्धयामास.

अथ नागोरनगरस्य समीपे 'खट्टूपूर' नामक. कश्चन ग्रामो वर्तते. तत्रातिप्राचीनोऽपारधनपरिपूर्णो गुप्त' कोशो वर्तत इति कि-वदन्तीं पृथ्वीराज. शुश्राव. श्रुत्वा च तं कोशमात्मसाच्चिकीर्षु सु-कुशलैर्मन्त्रशास्त्रकोविदैस्तं कोशमन्वैषयत्. तेऽपि निपुणमन्विष्य प्रत्या-गत्य 'अस्ति तत्र महान् कोश:' इति कथयामासु . तत' पृथ्वीराजो बुद्धिमता चतुरेण कयमापनाम्ना प्रधानामात्येन समं तत्स्थानं जगाम. अपश्यच्च तस्य कोशस्य प्रवेशद्वारे चतुरेण कोशस्य स्थापयित्रा स्थापिता मूर्तिं. अपठच्च तस्या शिर.प्रदेशे लिखितमिद वाक्यं.—

"शिरश्छित्वा धनं ग्राह्यं। अन्यथा दुर्लभं धनम्" चिन्तयामास च मनसि —यदि मदीयं शिरश्छित्वा धनं लभ्येत. तदा तस्य कोचोपयोगइति. एवंचिन्तापरे पृथ्वीराजे तच्चिन्ताकारणं ज्ञात्वा चतुर. क्यमासोनामामात्य' सस्मितमब्रवीत्—'स्वामिन्! नायमस्य वाक्यस्यार्थ. किंतु यावदस्या मूर्तेर्मस्तकं स्थिरमास्ति तावत्संपल्लाभोदुर्लभ' परंतु यदा कश्चन साहसिकोऽस्या मूर्ते शिरश्छिन्द्यात्तदा स तस्मिन्नेव क्षणे कृत्स्नमपि धनं लभेतेति. इद च तस्य भाषणं निशम्य संतुष्ट पृथ्वी-

खनाम्नैव शत्रूनकम्पयत् यस्य नाम श्रुत्वैव सर्वे रिपवः कांदिशीका अभवन्, स च सम्राट् पृथ्वीराजोऽधुना क्षुद्रस्याधर्मशीलस्य सप्तकृत्व पराजितस्य गिझनीपतेः शहाबुद्दीनस्य बन्दी नाम भूत्वा कारागारमधिवसति एतेनेद सुनिश्चित यत् कालप्रभावादेव हि सर्वे विजयन्ते पराजयन्ते च. एष एव शहाबुद्दीन सप्तकृत्व पराजितोऽपि पुनरपि दिल्लीश्वर विजतु प्रयतमानो विजयी बभूवेव. तत्सर्वदा मानवेनोद्यम करणीय एव. फलदाने च दैवमेव कारण. साम्प्रतं तु अहमेकाकी न शहाबुद्दीन जित्वा स्वामिन मोचयितुं प्रभवामि. अनुना तु दिल्लीश्वर मोचयित्वा पुनरपि सिंहासने तस्य स्थापना खपुष्पायते. अय चावतारसमाप्तिकाल एवेति निश्चित. भगवतीवचनानुरूपमस्मिन् भारतवर्षे क्षत्रियशासन विनाश्य यवनशासनमेव भवेदित्यत्र न सशय. ममापि नास्त्यधुना जीवनस्यावश्यकता. तथापि यावत्पर्यन्तं मम स्वामी पृथ्वीराजः कारागारवासदुःखमनुभवति तावत्पर्यन्त मदीयाः प्राणा नोत्क्रामिष्यन्ति. तस्मादधुना गिझनीश्वरदर्शनाय मया गिझनीनगर प्रति गन्तव्यं. तत्र गत्वा यदुचित तदेव कर्तव्यम् कुटिलमतिर्गिझनीश्वरो मा हि पृथ्वीराजस्य परम मित्र जानन् कदाचिन्मामपि कारागृहे वासयेत् ? तदितो निर्गतेन मया पुनरपि दिल्लीनगरदर्शनाकांक्षा न करणीया. यत्खल्वत्र कर्तव्यं तत्कृत्वैव गिझनीनगरं प्रति गन्तव्यमिति.

एव विचार्य कृतनिश्चयः स चन्दकवि प्रथमं स्वोपास्यदेवता भगवतीं सपूज्य दिव्यैस्तोत्रैस्तुष्टाव. सा तु प्रसन्ना स्वयमाविर्भूय चन्दकविमवदत्. वत्स चन्दकवे ! तुष्टास्मि. गच्छ गिझनीनगर.

त्वदभीष्टं सर्वमपि परिपूर्णं भविष्यतीति. भगवतीभक्तश्चन्द-
कविर्भगवत्या इदं भाषणं निशम्य सन्तुष्टः परमादरेणावोचत्—
मातः ! अत ऊर्ध्वमस्मिन् भारतवर्षे म्लेच्छस्य शासनं भविष्यति.
तत्त्वमपि अन्तर्हिता भव. एष चन्दकविश्च स्वामिचरणे सम स्वर्ग-
मागतस्त्वां पुनरप्यर्चयिष्यतीति वदन्नश्रुसिक्तपादकमलं प्रणिपत्य
भगवतीमन्दिरस्य कपाटं पिधाय बहिराययौ. बहिरागत्य गिज़नी-
नगरं जिगमिषुः प्रथमतः संयोगिताप्रासादमाजगाम तदभिवादनार्थं
चन्दकविः. आगत्य च तत्र भस्मावशेषां संयोगितां समीक्ष्य दुःखा-
कुलो भूमौ निपत्य परमरोदीत्. विललाप च -राज्ञि ! संयोगिते !
यद्यप्यहं त्वया दासीभिस्ताडितस्तथापि नाहं क्रुद्धः किंतु भगवति !
त्वां भूतलवासिनीं देवतां मन्वानः सदैव नमस्करोमि. राजकन्ये !
संयोगिते ! निरोपिनं पितरमप्यगणयित्वा त्वया खलु भारतललाम-
भूतः पृथ्वीराजो वृतः, तत्र च बहवः क्लेशा अजायन्त. परन्तु
धैर्यखनिस्त्वं तानसहथाः ईदृशैः प्रयासैर्लब्धेन भूपतिना समं न
चिरं विलाससुखान्यन्वभूः. परमात्मना चाकाल एव त्वं स्वर्गलोकं
नीता. देवि संयोगिते ! त्वया तु प्रज्वालेऽग्नौ निक्षिप्य स्वशरीरं
योगिनामपि दुर्लभो मोक्षः संपादितः परन्तु परममान्येन दिल्लीश्व-
रेण विना कथमेकाकिनी स्वर्गेऽपि स्थातुं शक्नुयाः ! अयं चाद्यापि
अराजासदैवभोगस्त्वदीयसमागतिलाभार्थमेवात्महत्यामकुर्वाण इहैव नार-
कीयातना अनुभवति. ताभ्यस्तं मोचयितुमहं प्रयते. तस्मात्
संयोगिते! असह्यमपि स्वपतिवियोगं किंचित्कालपर्यन्तं सहस्व! मदीय
आरंभे त्वं यशोदायिनी भवेति. विलप्य चैवं मूर्ध्नि निहिततत्प-

[illegible] न [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

गिजनी [illegible] शहाबुद्दीनोऽपि [illegible] [illegible], [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] चन्द्रकवि [illegible] [illegible] सभा गत्वा स्वविद्यया न परम् [illegible]. सर्वेऽपि तत्रत्या विद्वांस चन्द्रकविं परमस्तुवन्. राजा शहाबुद्दीनोऽपि तेन संलापेन बहु समलपत्.

[३]

एकदाऽतिविस्तीर्णप्रवाहाया नद्यास्तीरे महति प्रासादे सुखे-नोपविष्टं विविधदेशवासिजनशौर्यमुद्दिश्य प्रलपन्तं तं यवनाधिप-मुवाच चन्दकवि.–यवनराज ! युष्मदीया अत्रत्या जना शूरा एव तत्र न कस्यापि संशय.. परन्तु ते खड्गप्रहार एव कुशला न तु बाणैर्लक्ष्यवेधने. तत्र तु क्षत्रिया एव कुशला. द्रोणाचार्यप्रभृतयो भारतवर्तिन सर्वेऽपि बाणैर्लक्ष्यभेदने परं विख्याता आसन्निति महाभारतादिग्रन्थेभ्य एव ज्ञायते. इदानीमपि सन्ति सहस्रश शब्दवेधिन . ये खलु पिधायापि स्वनेत्रे केवलं शब्दं श्रुत्वा लक्ष्य-भेदं कुर्वन्ति. अहं तु मन्ये एतदलौकिकं बुद्धिकौशलमिति.

[illegible], [illegible] [illegible], [illegible] [illegible] [illegible]
[illegible]

[illegible] [illegible] [illegible] दुरवस्था-मवलोक्य [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] च [illegible] महाराज! [illegible] अहमस्मि [illegible] [illegible] [illegible]-श्चन्दकवि. वय च परमपापिनो यदस्मासु जीवत्सु त्वमीदृशं दुःख-मनुभवसि. नाथ! क्व चाद्य ते वन्दिवास, क्व च दिल्लीश्वर-सिंहासन. स्वामिन्! किमपराद्धमस्माभिर्यदित्थमस्मदुपरि परमात्मा कुपित? क्षत्रियकुलमुकुटमणे? त्वयैव खलु समरभूमावनेकवारं जितो मुक्तश्च, परन्तु दुर्दैवत प्राप्तराज्य त्वय्येव कृतघ्न पापी शहाबुद्दीन कथं वर्तयति. अथ च प्रसन्नो निर्जराऽति-रवश्यमेवास्य दुराचरणस्य फलं भोक्ष्यत एवेति.

पृथ्वीराजश्च तं प्रत्यभिज्ञाय महनैत्सुक्येन प्रसारितभुजयुगल परमानन्देनाश्लिषत्—उवाच च कविश्रेष्ठ! नात्र शोकस्यावसर. मानवो हि परमात्मना प्रचालितस्य संसारघटीयन्त्रस्य भाण्डमिव उन्नतिं लब्ध्वा मोदतेऽधोगतिं प्राप्य शोचति. वस्तुतस्त्वयं परतन्त्र एव. अहं चास्मिन् म्लेंछदेशे स्थित्वा निर्विण्णोऽस्मि. नात्र कोऽपि मामकीन. ईश्वरेच्छया मम सुखसाधने नेत्रे अप्यपहृते. तेनैव करुणात्मनाऽधुना त्वं प्रेषित:. तत्कथय किमर्थमत्रागतो भवान्. किमाश्रयाभावाद्गिज्ञनीपतिं सेवितुमिति.

ऽभूत. अस्तु. अपरो गुणो दीनदयालुता इच्छिनीकुमार्या कृपा-
याचकं पत्रं वीक्ष्य तस्मिन्नेव क्षणे स तस्या साहाय्यमकरोत्

तस्मिन् शौर्यमपि निरतिशयमासीत् तदनन्तरं संयोगितानिवास-
भवनान्निर्गतेनैकाकिना तेन सर्वे निरीक्षका निहता इत्यादिभ्य
कथाभ्य स्फुटमेव. वाचका ! प्राय इह जगतीतले दृश्यते यत्
खलु शूरा विलासो वा सन्ति न ते विलासिन इति परन्तु
पृथ्वीराज खलु पर शूरोऽपि विलासी आसीत् बह्व्यो राजकन्यका
स्तस्य विलासकौशलेन मोहितान्तःकरणा अभवन्त तथैव स दानशूरोऽपि

सज्जना ! बहुधा जना स्वदोषमपह्नुवाना गुणानेव प्रख्या-
यन्ति तेन सहसा दोषा लोकलोचनपथं नायान्ति. परन्तु लोकशि-
क्षणार्थं प्रयतमानेन प्रथमतो हानार्थं दोषा कथनीयास्ततश्च गुणा
अत्र तु प्रथमतो मया श्रीपृथ्वीराजस्य गुणा एव निरूपितास्तत्र
कारणमादरातिशय.. तथाप्यधुना दोषा निरूपणीया एव.

पृथ्वीराजे प्राधान्येन दोष --विषयासक्तिर्मृगया च. तत्र
तस्य विषयासक्त्या कियती हानिरभूदित्यत्र [illegible] एव
प्रमाण. राज्ञो हि विषयोपभोग आवश्यक. परन्तु नात्यन्त. स एव
प्राधान्येन सेवितो राजधर्मं दूषयति. एवं मृगयाऽपि. पृथ्वीराजश्च
यदा दुर्वाससः शिष्येण [illegible] तदा तेन [illegible]
ऊर्ध्वं अयं शापस्ते फलदो भविष्यतीत्युक्तोऽपि न किमपि मनसि
वैराग्यं धृत्वा स्वकर्तव्यपालने तत्परोऽभूत् प्रत्युत तथैव सर्वं
चिरं विस्मृतं.


द्वितीयो दोषोऽविचारिता. पृथ्वीराजश्च कुतश्चिदपि कारणात्संतप्तो नष्टसदसद्विवेकबुद्धिः सहसा नाना कुकर्माण्यकरोत्. अत्र च प्रमाण-चामुण्डरायस्य शस्त्रत्याग . चामुण्डरायस्तु महाबलः पृथ्वीराजस्य श्याल एवासीत्. तथापि कोपातिरेकेण स शस्त्र त्याजित एव. कयमाषामात्यस्य तु कथा हृदयविदारणी निःसंशयमुपरि कथित दोषमेव दृढयति.

महाभागाः ! पाठकाः ! एवरीत्या तस्यास्मच्चरित्रनायकस्य दोषा गुणाश्च कथिताः. सम्प्रति उपसंहरामि. यद्यप्येते स्युर्नाम तस्मिन् क्षत्रियमुकुटमणौ पृथ्वीराजे दोषाः. एकान्ततो हि दोषाभावः परमात्मन्येव ननु मानवे, तथापि पृथ्वीराजसमयेऽस्मत्पूर्वजाः सुतरा सुखिन आसन्नित्यत्र न संशयः. अधुना वय गुणवत्यपि राजनि भारतवर्षं शासति सति दुःखयामहे. अस्य वैषमस्य कारणं देवो वा दैवं वा यत्स्यात्तत्पणम्य पुनरप्यस्मिन् भारतवर्षे भारतवासिजनेषु पृथ्वीराजस्य धैर्यं, चामुण्डरायस्य शौर्यं, कयमासस्य दाक्षिण्य सावधानता च, संयोगितायाः गुणानुरागित्व, चन्दस्य स्वामिभक्ति विद्वत्ताचेत्यादय सर्वे गुणाः प्रकटीभवन्तु इति परमात्मान याचित्वा विरमामि.



ते राजानोऽभवन्. अधुनाऽपि अयं सर्वानर्थकारी परस्परद्वेषो न शाम्यति. अस्तु. प्रकृतमनुसराम.

अथ युद्धोद्यतौ तौ कनोजाधिपतिं पट्टणाधिपतिं च प्रेक्ष्य पृथ्वीराजश्चितोडनराधीशं स्वभगिनीपतिं समरसिंहं स्वसाहाय्यार्थं प्रार्थयत. सोऽपि स्वश्यालं संकटपतितं वीक्ष्य सहसा महता सैन्येन सह द्रोणगिरिं समाजगाम. ततोऽचिरादेव प्रवृत्ते भयंकरे समरे पृथ्वीराजः समरसिंहस्य साहाय्येन कनोजाधिपं पट्टणेश्वरं च पराजिग्ये. तयोश्च सैनिकाः कादिशीका वनाद्वनान्तरं भ्रमन्तो महता दुःखेन स्वस्थानं वासमयुः. स तु कपटी शहाबुद्दीन पृथ्वीराजेन जीवग्राहं गृहीतो मासद्वयं कारागारे स्थापितो महता प्रयत्नेन ' न पुनरेवं करिष्यामि ' इति शपथीकृत्य कथमप्यात्मानं मोचयामास. अदाच्चोपायनत्वेन पृथ्वीराजाय ' अष्टसहस्रसंख्याकानुत्तमानश्वान् ' पृथ्वीराजोऽपि वन्दिजनोच्चारितजयजयशब्दः स्वराजधानीं प्रविश्य सर्वाभिः प्रजाभिः सानंदः सत्कृतः स्वाश्रितेभ्यः परं धनमदात्. स्वसामन्तेभ्यश्च नानाविधान् प्रान्तान्. स्वसाहाय्यकारिणे भगिनीपतये समरसिंहायापि स महान्तं भूविभागं दातुमुद्यतोऽपि निस्पृहेन समरसिंहेन निषिद्धस्तूष्णीं तस्थौ. समरसिंहश्च सत्यमेव समरे सिंहोऽपि प्रकृत्याऽत्यन्तं विरक्तः शान्तश्च. स तु परमः शिवभक्तः सदैव रुद्राक्षमालास्तथा भस्म धारयति तेन जनास्तं योगीन्द्रमित्येवावदन्. अस्मिन् समये साहाय्यविषयेऽस्मिन् समरसिंहे राजा पृथ्वीपतिरपि परां प्रीतिं चकार. सोऽपि तस्मिन्



द्वितीयो गुच्छः ।

१ महंमदीयानां प्रवेशः ।
२ तैः समं क्षत्रियाणां युद्धं जयप्राप्तिश्च ।
३ पुनरपि तेषां युद्धार्थमागमनम् ।
४ संधिः. अजमीरत्यागः. इन्द्रप्रस्थवासः ।

[१]



वं गिझनीश्वरं शहाबुद्दीनं तथा स्वप्रतिस्पर्धिनौ कनोजपट्टणाधिपौ निर्जित्य प्रभूत धनं भूविभागं च लब्ध्वा प्रवृद्धयशा ग्रीष्मरविरिव प्रतापेनातप्यत् राजा पृथ्वीपतिः. स नियमेन प्रतिमासं कृष्णपक्षे तारागडदुर्गे सर्वतो दीपमाला प्रजज्वाल. तेन च तत् तारागडदुर्गमक्षयेण श्रीपृथ्वीराजयशसा मण्डितमिव शत्रूणा दुर्दर्शनमभूत.

अथैकदा प्रज्वालितानामसंख्यदीपावलीनां प्रकाशं वीक्ष्य मततो मक्कास्थो महमदीयमुख्यो मीराखान 'किंनिमित्तोऽयं प्रकाश'

भारतवीररत्नमालायास्तृतीयंरत्नम्

चरमक्षात्रियदिल्लीश्वर-
सार्वभौम-
श्रीपृथ्वीराजचव्हाणचरितम्

लेखक:
हसूरकरोपाह्वः श्रीपादशास्त्री
न्यायतीर्थः, वेदान्ततीर्थ, मीमांसातीर्थ, सांख्यसागर,
होलकरसंस्कृतमहाविद्यालयस्य
प्रधानाध्यक्षश्च.

एतच
इंदूरनगरे
श्रीगजानन प्रिंटिंग प्रेस, नाम्नि मुद्रणालये तदध्यक्षेण
प्रकाशकस्य कृते मुद्रापितम्.
(अस्य पुनर्मुद्रणे सर्वथा प्रकाशकस्यैवाधिकारः)

मूल्यं सार्धोरूप्यकः (१॥) प्रेषणव्ययः पृथक्

इत्यन्वेषणार्थं सशिष्यं रोशनवल्लिमजमीरनगरं प्रेषयामास. सोऽपि क्रमेणाजमीरनगरं प्राप्य सर्वं वृत्तं ज्ञात्वा पृथिवीन्द्रस्य पृथ्वीराजस्य शङ्कागम्यमैश्वर्यं प्रत्यक्षीकृत्य स्वदेशं गन्तुमियेष. स तु रोशनवल्लिरैन्द्रजालिकोऽजमीरनगरवासिभ्यः स्वागमनं निवेदयितुकामोऽनहसागरतडागस्य तीरे गजचर्म परिधाय हस्तेन मणिमाला वहन्नतिष्ठत्. प्रभाते च जलानयनार्थमागता नगरवासिनो यवनाक्रान्तं स्वमार्गमवलोक्योद्विग्नाः सर्वं वृत्तं नगराधिकारिभ्यो न्यवेदयन्.

अत्रान्तरे सुप्रसिद्धो भीमसेन इव बलिष्ठो भगवतीभक्तः चामुंडरायो नाम सामन्तः पृथ्वीराजस्य स्यालस्तडागमध्यवासिनीं भगवतीं पूजयितुं दैनिकक्रमानुसारेण तत्राजगाम. स च तडागमार्गरोधिनं तं यवनं वीक्ष्य क्रुद्धः सकोप—अरे यवनापसद! अत्र तडागप्रवेशद्वारमवरुध्य किमर्थं तिष्ठसि? इत्यपृच्छत्. सोऽपि रोशनवल्लिरैन्द्रजालिकः सहासं तं महाबलं चामुण्डरायं—रे नीच! मूर्तिपूजक! त्वमधमोऽसि इति प्रत्यवोचत्. चामुण्डरायस्तु क्रोधरक्तनयनस्तस्य यवनस्यापभाषितेन संतप्तस्तस्यैन्द्रजालिकस्य शिरश्छेत्तुं स्वखड्गं निष्कोषमकरोत्. स तु यवनस्तस्य चामुण्डरायस्य तेजस्विनीं भयकरां मुद्रामवलोक्य भीतः सहसा तस्मात्स्थलादपससार. चामुण्डरायोऽपि विवेकवशीकृतमनाः किं क्षुद्रस्य कीटसमस्यैकस्य यवनस्य हननेन प्रयोजनमिति विचारयन् भगवतीं पूजयितुं ययौ.

ततो द्वितीयदिने स धृष्टो रोशनवल्लिरैन्द्रजालिकः आपणे पूर्ववदतिष्ठत्. अपश्यच्च तेनैव मार्गेण गच्छन्तीमृध्र्या दधिभाण्डानि वहन्ती-

श्चतुःशतसंख्याका गोपीः. अयाचत च तास्वन्यतमा गोपी दधि. तया प्रदत्तं दधि मधुरं वाऽऽम्लं वेति ज्ञातुं कनिष्ठिकया लिलेह. आम्लं तदनभिमतमिति वदंस्तत्प्रत्याचख्यौ. गोपी च यवनस्पृष्टं तद्दधि अपवित्रं मन्यमानाऽगृहीत्वाऽग्रे जगाम. स तु यवनस्तेनापमानेन संतप्तः स्वसामर्थ्येन तासां गोपीनां वस्त्राणि अध पातयामास. ताश्च लज्जाकुलाः स्वलज्जारक्षणार्थं युगपदध उपाविविशुः. ततोऽखिलान्यपि दधिभाण्डानि पतित्वा विदीर्णानि. दधि च मृत्तिकासाद्बभूव. तस्मिन्दिने राजप्रासादे दधिदुर्भिक्षमभूत. नागरिकैश्चैषा वार्ता न्यायालयं नीता राज्ञा श्रुता. प्रजापालनतत्परः पृथ्वीराजस्तस्मिन्नेव क्षणे स्वप्रजानां पीडक प्रशास्तु रामरायगुजरधीरपुडीरनामानौ शूरौ द्वौ सामन्तौ प्रेषयामास. तौ च तत्रागत्य तं रोशनवालिं रज्जुभिर्बध्वा पृथ्वीराजसमीपमानयताम्. राजा च ' ययाऽगुल्याऽनेन यवनेन दधि दूषितं सा च्छेत्तव्या ' इति स्वसेवकानादिशत्. स तु यवन इमा राजाज्ञा निशम्य कोपाकुल ' राजन् ? त्व ममांगुलि यदि च्छिनत्सि तदा तवेद तारागडदुर्गमप्याचिरादेव च्छिन्नं भविष्यति ' इत्युवाच राज्ञा राजसेवकैश्च तदीयमिदं भाषणमनादृत्य तस्यागुलिः छिन्नैव

[२]

अथ स रोशनवालिर्यवनश्छिन्नागुलिः क्रमेण स्वस्वामिनः सन्निधिं गत्वा सर्व वृत्त न्यवेदयत्. प्रार्थयच्च—स्वामिन्! यत्खलु तस्मै पृथ्वीराजाय ' ममांगुलिं छिनत्सि परन्त्वचिरादेव तव, तारागडदुर्गं

छिन्नं भविष्यतीति अवदम्. तन्नत्यं करणीयमिति. स तु मीरनाम तत्स्वामी सर्वानपि स्वसाहाय्यकारिण आहूय सर्वं वृत्तं कथयित्वा युद्धार्थमादिशत. तेऽपि स्वजातीयस्यापमानं वीक्ष्य क्रुद्धाः स्वस्वामिनियोगं शिरसा धारयन्तो योद्धुं समनह्यन्. सोऽपि मीरखान ऐन्द्रजालिकः खिगनामानमश्वं दिव्यामसिलतां क्षुरिकां च गृहीत्वा सर्वैः सह पृथ्वीराजं जेतुं निरगच्छत्. तस्मिन् समये तस्य मीराखानस्य विवाहार्थं मातुलः स्वाजापीरोऽमूल्यानि वस्त्राणि गृहीत्वा तत्रैव समाजगाम. तं च समागतं प्रेक्ष्य मीरखानोऽवदत्—मातुल ! वयं सर्वे धर्मयुद्धार्थं भारतवर्षं गच्छाम. तत्र यदि विजेष्यामहे तदा महताऽऽनन्देन विवाहं विधाय युष्माभिरानीतानि वस्तूनि ग्रहीष्यामः. अथ यदि विपरीतं वृत्तं [illegible] शेषेणैवावशिष्टेन सैन्येन सह यूयं साहाय्यार्थमागच्छतेति. सोऽपि मातुलः सर्वमिदमंगीचकार.

ततश्च कतिपयदिवसैस्ते सर्वेऽपि महंमदीया नौकानु [illegible] भारतभूमिमागच्छन्. अवतीर्य च समुद्रतीरे [illegible] स मीरखान सह स्वसहायैः 'शकि' घर योगिवेषेण [illegible] ज्ञातवृत्तान्तः पृथ्वीराजः सावधानो युद्धार्थं स्वामिनिदेशं [illegible] तदृश्य येनापि मिषेण निभृतं तद्राज्यं प्रविश्य तं विजेष्यामहे इति मन्त्रयामासुः. अस्मिन्नवसरे तदनुयायिनः सर्वेऽप्यनुकूला अभवन्.

अथ स मीरखानोऽभिलषितां [illegible] [illegible] [illegible] [illegible] [illegible] स्वसैनिकान् प्रत्यादिशत् [illegible]

धिकारिणोऽपि न सत्यमेतत् किमिदं मन्यमाना गागाणि स्वयं न प्रत्ययमकुर्वन्. अचिरादेव स मीरखानोऽश्वविक्रयार्थमिति व्यापारं कल्पयामास. पृथ्वीराजश्च कोऽपि परदेशस्थो यवनोऽत्युत्तमानश्वान् गृहीत्वाऽत्र समायातस्तान्विक्रेतुमिच्छतीति किंवदन्तीं निशम्य स्वामात्यं कयमासमश्वानां निरीक्षणाय तथा क्रयणाय च प्रेषयामास. सोऽपि मीरखानस्य वासस्थानमागत्य सर्वानश्वान् रजतशृंखला-निबद्धान् जलपानार्थं पुरस्थापितरजतभाण्डानल्पजमान् वीक्ष्य स-तुष्टस्तेषां मूल्यमपृच्छत्. स च मीरखानस्तन्मध्येऽस्याश्वस्य मूल्यं लक्षमुद्रा अवदत. एतादृशं तेषां महामूल्यत्वं निशम्य विस्मितः स कयमासामात्यस्तान् क्रेतुं न शशाक. ततः क्रमेण सर्वानप्यश्वान् पश्यन् शिरोमणिरश्वराजस्य शालामाजगाम. तं वीक्ष्य स प्रधानश्रेष्ठोऽत्यन्तं सन्तुष्टस्तस्याऽपि मूल्यं पप्रच्छ, मीरखानश्च कुटिलमतिः पृथ्वीराजस्य धनं हर्तुमनास्तस्य मूल्यं षट्त्रिंशत्कोटि-मुद्रा अकथयत्. तन्निशम्याश्चर्यमग्नः सोऽमात्यः प्रत्यागत्य सर्वं वृत्तं पृथ्वीराजाय न्यवेदयत्. पृथ्वीराजोऽपि तमश्वं समीक्ष्यात्य-न्तं सन्तुष्टः क्रयणार्थं निरचिनोत्. कृत्स्नं कोशागारस्थं द्रव्यं वितीर्य तस्मिन्नेव क्षणे सोऽश्वराजो महतोत्सवेन मन्दुरां नीत्वा निबद्धः महान्तं हेषारवं चक्रे पादैश्चाताडयद् भूमिं तदानीमेव तस्य हेषारवं श्रुत्वा श्रीपृथ्वीराजस्य वाजिशालास्था षट्त्रिंशत्सहस्र-संख्याका अश्वा सहसा प्राणानमुंचन्. तारागडदुर्गमपि भूकम्पेन द्विधा बभूव. तान्येतानि दुश्चिन्हानि वीक्ष्य सर्वेऽपि स्वामिनिष्ठा नागरिका प्रजाजना अत्यन्तं बिभ्यु. स्वस्वामिरक्षणा-

येश्वरं प्रार्थयमानुश्च. एव प्रचलिते कोलाहले स दुष्टो रोशनवाछि-च्छिन्ना स्वीयामंगुलि प्रदर्शयन्—मदीयागुलिच्छेदस्य फलं दर्शयितु-महमागत ' इति वदन्नजमीरनगर इतस्तत पारिवभ्राम.

अथ ते सर्वेऽपि यवना सम मीराखानेन वाजिविक्रेतृवेषा-न्त्यक्त्वा योद्धुं समनह्यन्. पृथ्वीराजोऽपि तान् युद्धोद्यतान्विज्ञाय स्वसेना प्रेषयामास. सम्प्रवृत्ते युद्धे पृथ्वीराजस्य बहव. सैनिका' समरांगणेऽशेरत.

तत स मीराखान पृथ्वीराजमवदत्—राजन् ' किमर्थं सैनि-कानां वृथा क्षय ' युष्माभि कश्चनैको वीरो निष्कासनीय. तेन सममस्माक वीरो युध्येत. अस्मिन् द्वन्द्वयुद्धे यत्पक्षीयो वीरो विजयेत स पक्षो यशस्वी सवृत्त इति वय सर्वे वदामो यूयं चेति. पृथ्वीराजश्च तस्येद भाषणमगीकृत्य सर्वसामन्तानां महतीं सभा कारयित्वा समक्षमिद वृत्तं निवेद्य सर्वानपि युद्धार्थं प्रोत्साहयामास. ते च सामन्ता शूराअपि राज्ञा स्वय प्रोत्साहिताअपि स्वपराभवेन राज्ञ पराभवं शकमाना न शेकुस्तस्मिन् द्वन्द्वयुध्येऽभिनिवेष्टुम्.

शूरनरवीरश्चामुण्डराय सर्वानपि सामन्तान् स्तब्धानवलोक्य स्वस्वाम्यपकीर्तिं परिजिहीर्षुर्विधित्सिते साहसे स्वोपास्यदेवताया भगवत्या अभिप्राय जिघृक्षुस्तन्मन्दिरं गत्वाऽनन्यभावेन तामस्तौत् परन्तु पूर्ववद्देवी प्रत्यक्ष 'नाभूत्. तेन च विस्मितश्चामुण्डरायो माहिष बलि कल्पयामास. ततोऽप्यसन्तुष्टा देवीं विलोक्य नितान्तं खिन्न स्वयमात्मान बलिं विधातु खड्गं यदा निष्कोषमकरोत,

तदा तु स्वशिरश्छेदनायोन्नमितं हस्तं स्वयं हस्तेन गृह्णन्ती देवी चामुण्डरायमवदत्—भक्तश्रेष्ठ ! प्रीताऽस्मि तवानेन भक्तिविशेषेण. परन्त्वस्मिन् भरतखण्डेऽतऊर्ध्वं यवनानां राज्यं भविष्यति. तेन युष्माकं यशः प्राप्तिर्न. यद्भावि तद्भाव्येव. न तत् कोऽप्यन्यथाकर्तुं समर्थः ! तथापि भाविनि युद्धे यदि त्वं योत्स्यसे तदा त्वामहं रक्षिष्यामि इति. अन्तर्दधे च शीघ्रमेव. चामुण्डरायश्चेदं भगवत्या वचनं निशम्य सन्तुष्टो गृहमाजगाम. अथ द्वितीयदिने पृथ्वीराजः पुनरपि सर्वेषां सामन्तानां सभां कृत्वा द्वन्द्वयुद्धार्थं सर्वान्विज्ञापयामास. तदा चामुण्डरायः - मीराखानपक्ष्येण केनापि योधा योद्धुं प्रतिजज्ञे. मीराखानोऽपि 'उजबकफकीर' नामानं वीरं युद्धार्थमयोजयत्. ततः प्रवृत्ते युद्धे चामुण्डरायो भगवत्या रक्षितस्तस्य यवनवीरस्य शिरांसि निच्छेद.

तदानीं पृथ्वीराजस्तत्पक्ष्याश्च सर्वे सामन्ताः स्वविजयं मन्यमाना महताऽऽनन्देन शंखनादं चक्रुः. यवनास्तु पराजयेन क्रुद्धा नानाविधान् दुराचारानकुर्वन्. स्वप्रतिज्ञां विस्मृत्य ते सर्वेऽप्ययुध्यन्त. अनङ्गसागरतटाके गा हत्वा चिक्षिपुः. तेन क्रुद्धः स पृथ्वीराजः सर्वान् यवनान् हन्तुं स्वसैनिकानादिदेश. तेऽपि च प्रायः क्षत्रिया रोषावेशेन सत्वरं सर्वानपि यवनान् स्वासिलतावर्त्मना हार्षुः. स कपटी सेनानीरपि तस्मिन् समरदावानले शलभतामगमत्.

एवं पराजितास्ते यवना पृथ्वीराजयशोहरणाय समागता कन्दर्प [illegible]

[३]

उपरिनिर्दिष्टो यवनमुख्यः स सीराजानो यदा भारतवर्ष-
मागन्तुं प्रवृत्तस्तदा तस्य विवाहार्थं मातुलः ' ख्याजापीरो ' नाम
यवनस्तत्रागच्छदिति पूर्वं निवेदितं. सोऽपि सात्त्विक स्वमतस्थाग-
श्रेन सीराजानं मृतं ज्ञात्वाऽत्यन्तं संतप्तः स्वभागिनेययवनस्य प्रती
काराय क्रमेणाजमीरनगरमाययौ. सोऽपि जनहस्तागतस्य तीरे शेखन-
वल्लिरिव तस्थौ. नागरिकाश्च शेखनवल्लियवनस्य पुरा जानन्त पर
भीतास्तस्मिन्नेव क्षणे पृथ्वीराजाय तद्वृत्तं न्यवेदयन्. सोऽपि
शेखनवल्लिआगमनं तन्मूलकं च भयंकरं समरं प्रत्यभिजानन्न स
पीडयितुं सर्वानादिदेश. तथाप्यपरं यवनं समागतं वीक्ष्य बिभ्यत-
स्तस्मात्स्वस्य स्वराज्यस्य चानिष्टं शंकमानस्तस्य नाशार्थं [illegible]
प्रार्थयत. तेऽपि प्रकटीभूय राज्ञा तस्य यवनसाधोर्नाशाय [illegible]
स्थानं [illegible] प्रदर्शयामासुः. तदा मन्त्रिमण्डलेन सह विचार्य
पृथ्वीराजस्तस्य यवनसाधोर्मनोहरणाय सुन्दरीं तरुणीं प्रेषयामास.
सापि तस्य यवनसाधोः समीपं गता तेनैव स्वमतस्थागमेनापि [illegible]
[illegible] तस्य दासी नगरे पृथ्वीराजस्य सर्वमेतद्वृत्तं [illegible]
विश्वासघातमूढो बभूव.

अथ स्वामिनं चिन्तातुरं वीक्ष्य [illegible]
स्वयं पृथ्वीराज ' स्वामिन् [illegible] गत्वा तस्य [illegible]
[illegible] निवाय [illegible] ' इति [illegible]. पृ[illegible]
राजस्य [illegible] तस्य यवनसाधोः [illegible]

(४)

पृथ्वीराजस्तु चन्दस्य भाषणं निशम्य दुःखितः सर्वसामन्तानाहूय किं कर्तव्यमिति विचारार्थं महतीं राजसभां चकार. यथासनमुपविष्टेषु सर्वेषु पराक्रमशालिषु क्षत्रियवीरेषु स प्रसादी चन्दवंदी सर्वं तस्य यवनस्य भाषणं राजानुमत्या सर्वान् सभ्यानश्रावयत्. तच्चोग्रं भाषणं निशम्य सतसा अपि ते क्षत्रियश्रेष्ठास्तस्य यवनस्यैन्द्रजालिकविद्यापाटवं स्मरन्तो भीतास्तूष्णीमतिष्ठन्. चन्दवन्दी तु पृथ्वीराजं तथा सर्वान् सभ्यानुद्दिश्येत्थमभाषत—क्षत्रियकुलावतंस ! सकलभूपालशिरोमणे ! पृथ्वीपते! स्वामिन्! सभ्या मद्देशबान्धवा ! अहं च स्वामिपादैरेतत्कार्यार्थमेव तस्य यवनस्यान्तिकं प्रेषितः. अहं चेतो गत्वा क्रमेण तस्य मैत्रीं सपाद्य सर्वं मनोगतमज्ञासिषम्. स च यवनसाधुः स्वसंबंधिना घातेन क्रुद्धस्तच्छोणिताकितमिदं स्थानं जिघृक्षति. तस्मिन् यवनेऽस्ति काचन दैवी शक्तिरित्यत्र न संशयः. तदधुनाऽहं विहाय विचारः करणीयः. स तु यवनः केवलमिदं नगरमेव याचते. तदहं मन्ये वयं सर्वेऽपीतो गत्वा दिल्लीनगरमेव राजधानीं कुर्मः. एतदर्थं स यवनोऽस्मभ्यं चतुष्कोटिपरिमितं सुवर्णनिधिं ददातीति. इदं च चन्दकवेर्भाषणं श्रुत्वा पृथ्वीराजः सर्वं तदीयं मित्रमण्डलं च तस्य यवनसाधोर्याचनां पूरयितुं निरणयन्. द्वितीयदिने पृथ्वीराजः समं मन्त्रिमण्डलेन तस्य यवनसाधोर्दर्शनार्थमगच्छत्. विनयेन च तं प्रणनाम. स तु यवनसाधुर्विनयिनं पृथ्वीराजमवलोक्य संतुष्टः 'दिल्लीपते ! आगच्छ !' इत्युक्त्वा स्वागतं व्यधात्. राजाऽपि तस्य यवनसाधोर्दैविकशक्तिमत्त्वे जातनिश्चयः परमादरेणावर्तत.

अथ पृथ्वीराजस्तस्य यवनसाधोर्निर्देशमनुसृत्याजमीरनगरं त्यक्त्वा दिल्लीनगरं प्रति प्रस्थातुं मनश्चक्रे. यद्यपि पृथ्वीराजः स्वपितृपितामहादिभिः पूर्वजैरुपभुक्तं समीपविराजमानपुष्करक्षेत्रमजमीरनगरं विहातुमत्यन्तमदुःखायत, तथापि चन्द्रकविप्रभृतिभिर्दिल्लीनगरस्य निवेदिता राजधानीत्वयोग्यता निशम्य कथमपि अजमीरनगरवियोगदुःखमसहत. ततः सुमुहूर्ते सर्वान् स्वकोशांस्तथा सेनाविभागान् गृहीत्वा सर्वमजमीरनगरं तारागडदुर्गं यवनाधीनं विधाय दिल्लीनगरवासार्थमुत्सुकैः प्रजाजनैः सममिन्द्रप्रस्थं गन्तुं प्रतस्थे. अलभत चाचिरात्तेन यवनसाधुना कथितं चतुष्कोटिमुद्राशालिनं सुवर्णनिधिं. तेन च तस्मिन् यवनसाधौ जातविश्वासः पृथ्वीराजोऽजमीरवियोगदुःखं व्यस्मरत्. क्रमेण गच्छन् मार्गे समरपतितानां स्वसैनिकानां मोक्षार्थं गयाक्षेत्रे सर्वेषां श्राद्धानि चकार.

ततः कतिपयदिवसैः स भाग्यशाली पृथ्वीराजः सह स्वामंत्रिमंडलेन कौरवपाण्डवाधिष्ठितं निर्मलनीलजलशालिन्या यमुनया समाश्रितं. प्राचीनचन्द्रवंशप्रसूतराजर्षिभिः स्थापितानेकमहोन्नतकदण्डमण्डितं. आश्चर्यकारिशिल्पविद्याप्रवीणैः शिल्पिभिः निर्मितानेकमहासौधावलीमण्डितं, स्वसम्पत्त्या तुच्छीकृतकुबेरनगरीकं, कार्तिकेन समीपवर्तिराजमानकुरुक्षेत्रं दिल्लीनगरं प्राप. सुमुहूर्ते च नगरं प्रविश्य पूर्वजैः पवित्रीकृतं सिंहासनमधिरोह

Publisher Shripad Vaman Husurkar,
Imli Bazar, No. 70, Indore City

Printer -Prabhakar Sadashiv Chincy,
Shree Gajanana Printing Works, Indore

(All right reserved by the Publisher.)

सर्वे च नगरवासिन स्वराजसिंहासन रिक्त वीक्ष्य दु खायमाना सम्प्रति स्वस्वामिदौहित्रेण प्रतापशालिना पृथ्वीराजेन समलकृत तत्सिंहासनं विलोक्य सर्वं प्राचीन दु ख व्यस्मार्षु. वाचका ! इत्थ पृथ्वीराजोऽजमीराधिपत्य विसृज्य दिल्लीपतित्व स्वीचकार. यवनाश्चाजमीरप्रान्ते बद्धमूला अभवन्.



अर्बुददेशे जैतप्रमारनामा राजा यथानियमं स्वप्रजाः पालयन् राज्यं करोति. तस्य सलखनामा पितृभक्तः पुत्रः, इच्छिनीकुमारी नाम कन्येत्यपत्यद्वयमास्ति. तत्रेच्छिनीकुमारी साम्प्रतं षोडशवर्षदेशीया परमलावण्यखानिः पृथिवीवातनी तिलोत्तमेव भाति. तस्याश्च मयूरपिच्छभारगर्वहारी केशकलापः, सुवर्णपट्टविशदं ललाटपटलं, मदनशरासनापमानकारिण्यौ भ्रुवौ, जितशुकचञ्चुर्नासिका, अधरीकृतबिम्बफलोऽधरोष्ठः, कम्बुरिव मनोहारिणी ग्रीवा, बिसतन्तू इव कोमले बाहुलतिके, नूतनविकासिकमलकुड्मलद्वयमिव मूर्तिमल्लावण्यनिधिद्वयमिव, द्विधाभूतं मूर्तं भोक्तुर्भाग्यमिव नूतनं कुचयुगलं, परमसूक्ष्मं त्रिवलीममलङ्कृतमुदरं, रम्भासौन्दर्यप्रवर्धके सक्थिनी मञ्जुलमञ्जीरसमलङ्कृतौ गुल्फौ, नवकिसलयमृदुनी प्रपदे, कोकिलविभ्रमकारी मधुरो रवः, किंबहुना सर्वमेव गात्रं विधात्रा स्वकौशलप्रदर्शनार्थमेव निर्मितम्. साम्प्रतं तु सा सञ्चारिणी रतिरिव लीलयैव तरुणानां राजपुत्राणां मनांस्याकर्षति. न जाने तस्या अलौकिकसौन्दर्यस्य भोक्तारमिह भारतवर्षे कमजनयद्भगवान्विधातेति.

श्रुत्वा चेदं वृत्तं स भीमदेवः कामाकुलस्तां याचितुं स्वाश्रितममरसिंहपण्डितं जैतप्रमारराजस्य समीपे प्रेषयामास. न्यवेदयच्च तन्मुखेन—राजन्! तव कन्या विवाहार्हा लावण्यशालिनीत्यस्माभिः श्रुतम्. वयमपि बलाढ्या अनेकसामन्तपरिवृतास्तया सह विवाहं कर्तुमिच्छामः. तदस्मान् सम्बन्धयोग्यान् ज्ञात्वा यदि स्वकन्यामस्मभ्यं समर्पयिष्यसि तदा तव कुशलं भविष्यति, अन्यथा तु अस्माभिराक्रान्तो

दूतत्वेन प्रेषयामास. सोऽपि च गत्वा राजसभां सिंहासना-सीन भीमदेव—गुर्जराधिपते ' भीमदेव ' दिल्लीपति पृथ्वीराजस्त्वा-मादिशति युद्धान्निवर्तस्व इति. यतस्त्वमेव प्रथमतोऽधर्मं कृत्वा तस्य समारंभितस्य कन्यां विवाहार्थं याचितवान्. ततश्च तस्य वृद्धाय खलस्य... [illegible] तेन मम युद्धाय प्रवृत्तोऽसि न न पश्चात् [illegible] दत्वा ... [illegible] त्वयापि स्वकन्या ददातु. तत हठस्य कोऽवकाशः. तथाहि ... [illegible] परित्यज्य युद्धात् निवर्तस्व. अन्यथा मरणमेव भविष्यतीति जगाद. स तु गुर्जराधिपतिश्चन्द्रकवेर्मुखान्निर्गतं पृथ्वीराजसंदेशं नि-शम्य ... सकोप—रे बन्दिपुत्र ' चन्द ' किमिति प्रलपसि त्वमितो गत्वा राजानं वद—न्याय्यान्याय्यविचारं वयं जानीमः. शस्त्रेणैव कुमा-... [illegible] आगमनेन पुनः कथं च. अहं तु पश्यामि मम कन्यायाचना न्याय्यैवेति. यतः सर्वरत्नानां भाजनं राजेति सर्वशास्त्रकारा वदन्ति .. जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते'' इतिन्यायेन जैतप्रमारस्य कन्याऽपि नारीरत्नं. तेन मया सा राजा नेतुं याचितेति. तत्त्वं गत्वा-... [illegible] कथयति—पृथ्वीराज ' अद्यापि किञ्चित् ... कथय—भीमदेव ... स्वपितृदशामचिरादेव लप्स्यसे इति युद्धाभिलाषं ... अन्यथा स्वपितृदशामचिरादेव ... निवर्तस्व. अन्यथा ... दूतत्वमगमिता न कि-... [illegible] चन्दकविश्च स्वस्वामिनिन्दामाकर्ण्य ... ततोऽपि दूतत्वमगमिता न कि-... [illegible] आगच्छञ्च पृथ्वीराजस्य विस्तीर्णं स्कन्धावारम्.

(३)

पृथ्वीराजश्च स्वदूतस्य चन्दकवेर्मुखात् सर्वं भीमदेववृत्तान्तं निशम्य तत्क्षणमेव यथासमये युद्धप्रारम्भार्थं स्वसेनापतिमादिदेश.

अचिरादेव भीमदेवोऽपि स्वीयमाश्विकदलं पदातिदलं च गृहीत्वा पृथ्वीराजसेनाभिमुखो बभूव. एवं कुरुक्षेत्रे प्रबलयो कौरवपाण्डवयो सेनेइव तयोरपि सेने साभ्रमत्या नद्या उभयकूलयोरतिष्ठताम्. पृथ्वीराजसेना च सम्यक् व्यवस्थाप्य भीष्मसमो युद्धकुशलो वृद्धः पृथ्वीराजस्य पितृव्य कन्हचव्हाणः शत्रुभिर्दुर्भेद्यान् सेनाव्यूहान् कल्पयामास पृथ्वीराजश्च स्वसेनाया आधिपत्ये महाप्रतापिनं द्वितीयमर्जुनमिव शरसंधाने स्वामिभक्तं कर्तव्यपरायणं नीरधररायराठोडमभिषिच्य स्वहस्ते तदीयं हस्तं गृहीत्वा प्रेम्णाऽवदत्. सेनापते ! एतेषां सर्वेषां सैनिकानां प्राणा मम च प्राणा यशश्च सर्वमेव त्वदायत्तं. एष ह्यवसरो युद्धशास्त्रचातुर्यप्रदर्शनस्य. तत्त्वं शस्त्रविद्यापाटवप्रदर्शनेन रिपून्विजित्य स्वस्वामियशो धवलीकुरु ' इति

स तु स्वामिभक्त सेनापति साक्षात् पृथ्वीराजस्येदं समुत्तेजकं भाषणं निशम्य सन्तुष्ट सावेशं तं प्रत्युत्तरयामास—स्वामिन् ! नास्त्यत्र किमपि चिन्ताकारणं ' स्वामिना मम सैनिका युद्ध्यमानाः कीदृशानि शौर्यकृत्यानि कुर्वन्ति तत्केवलमवलोकनीयम्. सामन्तवर्गश्चाचिरादेवास्मच्छत्रुं कान्दिशीकं करिष्यति अनुभूतानेकयुद्धा स्वामिना पितृव्यचरणा सर्वथाऽस्मान् साहाय्ययिष्यन्ति तेन निःसंशयमस्माकमेव विजयो भवेदिति.

राजा च तस्य सेनापतेरिदं भाषणमाकर्ण्य सन्तुष्टमना एकां मुक्तामालां ददौ ततश्च स्वयं महान्तं सुलक्षणं सुशिक्षितमश्वमारुह्य पितृव्यसेनापतिभ्यां सह सर्वं सैन्यं निरीक्षमाणः इतस्ततः परिबभ्राम

अचिरादेव चोभयसैनिका परस्परानाक्रम्य सावेशमयुध्यन्त. खड्गिनश्च स्वखड्गप्रहारैः शत्रुपक्ष्याणां खड्गिनां गात्राणि शकलयामासुः. धानुष्काश्च स्वबाणैर्दूरवर्तिनामपि धन्विनां प्राणानहरन्. मत्ता इभाश्चेतस्ततः सञ्चरन्तः स्वपादाघातैः सहस्रशो मानवानचूर्णयन्. सादिनश्च स्वभल्लक्षेपैः परेषामुदराणि विदारयामासुः.

अथोभयसैनिकेषु परं युद्धकौशलं प्रकटयत्सु दोलायमानां विजयलक्ष्मीं वीक्ष्य पृथ्वीराजश्चिन्तातुरो बभूव. पितृव्यः कन्हचव्हाणः स्वभ्रातुष्पुत्रस्य मुखकमलं म्लानं वीक्ष्य चिन्तापरिहारार्थं सोत्साहमवदत्—तात पृथ्वीराज! किमित्यस्मासु जीवत्सु त्वं युद्धविजयस्य चिन्तां वहसि. वयं चानेकयुद्धेषु संपादितविजया अस्मिन्युद्धविजये न संशयमपि कुर्म इति.

पृथ्वीराजश्च स्वपितृव्यस्योत्साहप्रदं भाषणं श्रुत्वा सस्मितवदनकमलः 'पितृव्यचरणाः! सत्यमेवेदं. नात्राणीयानपि संशयः. अहमपि युष्मासु युष्मद्युद्धकौशले च सर्वथा विश्वसिमि. तथापि समय एव सर्वेभ्योऽपि बलीवान्. कथमन्यथा प्रबलोऽपि सुग्रीवः केवलं स्वजायामपि रक्षितुं न प्राभवत्? साक्षादीश्वरस्यावतारो रावणारिरपि रामचन्द्रो दण्डकारण्ये स्वपत्नीं सीतादेवीमपि त्रातुमसमर्थो बभूव! पञ्चसु पाण्डवेषु जीवत्सु भीष्मद्रोणादिषु योधृषु द्रौपदी स्वलज्जारक्षणाय भगवन्तं यशोदानन्दनमेव प्रार्थयामास? तत् वयं तु केवलं स्वकर्तव्यविधाने दक्षा भविष्यामः. अतः परं सर्वं दैवायत्तमित्यब्रवीत्.

प्रस्तावना.

प्रियमहाभागा! आर्यवंशजा.! बान्धवा! इदं हि सकलक्षत्रियकुलावतंसस्य धीरवीरशिरोमणेः शौर्याकरस्य औदार्यसागरस्य चव्हाणकुलभूषणस्य सार्वभौमस्य पृथ्वीराजस्य चरितं भारतवीररत्नमालायां ग्रथितं भवद्भ्यः समर्पयतो मे हृदयं परं मोदते. यथाहि भारतवीररत्नमालायाः प्रथमरत्नस्य महाराजप्रतापसिंहस्य चरितं सर्वगुणमण्डितं तथैवास्यापि परन्तु केवलमिदं दुःखपर्यवसायि तत्तु आनन्दपर्यवसायि. महाराजः प्रतापसिंहो हि सदा निस्पृहवृत्त्या जीवनान्ते स्वमनोरथं सफलीचक्रे अथ पृथ्वीराजस्तु तत्तुल्यशौर्यादिगुणमण्डितोऽपि विषयासक्त्या स्वराज्येन सममात्मानं नाशयामास. एतदेव बोधयति सदा शुभोदयेच्छुना मानवेन जितेन्द्रियेण भाव्यमिति. अपरं च यथाहि महाराजः प्रतापसिंहः सर्वैः स्वकीयैः सममैकमत्येनावर्तत न तथाऽयं. तेन कनोजाधिपप्रभृतयः क्षत्रिया अपि तत्पराजयार्थं प्रयतमाना यवनानत्रानीय सर्वमपि स्वातंत्र्यं नाशयामासुः. बान्धवा! इदमपि बोधयति-स्वकीयैः सम द्रोहो न करणीयः, कुतोऽपि न परकीयसाहाय्येन दूरीकर्तुं प्रयतनीयमिति. अस्तु।

वाचकाः एवं यद्यपि अनयोर्महाभागयोर्भेदो वर्तते तथापि क्षत्रियगुणास्तएव. यथाहि पृथ्वीराजस्यौदार्यं सप्तकृत्वः पराजित्य बन्दीकृतस्य स्वशत्रोः शहाबुद्दीनस्य मोचनेन प्रतीयते तथैव कृतघ्नस्य तस्य नीचत्वं महाराजपृथ्वीराजनेत्रोद्धरणेन. यथाहि चन्दकवेः स्वामिभक्तिः चामुण्डरायस्य धैर्यं तथैव हाहुलीरायस्य स्वामिद्रोहः!

घटसुशोभित. अविरतध्वनत्पटहढक्कादिवाद्यजातसुरम्य संस्कृतवीथ्याक. राजधानीमबूनगर प्रविश्य स्थानेस्थाने नागरिकमुख्यै कृत सत्कारविशेष गृह्णन्नतिमनोरम. विविधकुसुमितलताकुञ्जमय. सहकारादिवृक्षजातनिवारितातप. राजाराममागत्य कल्पिते राजप्रसादकल्पे निवासेऽवसत्. वृद्ध प्रमारजेत स्वसाहाय्यं विधाय स्वराज्यरक्षणेन च कृतज्ञस्तथा पृथ्वीराजमसेवत यथा पृथ्वीराजस्तत्सामन्ता मित्रमण्डलं च परं मुमुदे.

तत कतिपयदिवसै प्रमारजेत स्वमन्त्रिमण्डलमाहूय विचारयन्ति स्म. इदानीं चाह वृद्ध . मदीय पुत्र सलखस्तु बालएव. कन्या तु इच्छिनीकुमारी लावण्यवती विवाहार्हा सवृत्ता. तत्पुनरपीदृशी विपत्तिर्मागच्छत्विति तस्या विवाह शीघ्रमेव करणीय अह च यावत्पश्यामि तावत्पृथ्वीराजादन्य सुयोग्य वरं नावधारयामि. पृथ्वीराजेन चास्मिन्युद्धे साहाय्यविधानेन वयं सर्वेऽप्युपकृता मदीया कन्याऽपि दिल्लीपते राज्ञी भवितुं सर्वैर्गुणैरर्हैव. तदस्मै दुर्लभाय गुणवते पृथ्वीराजाय कन्या दत्वा युवराज च राजासनेऽभिषिच्य चरमवयोयोग्यमात्मसाधन कर्तुमिच्छामीति. अयमर्थश्च सर्वेषा मन्त्रिणा सम्मतो बभूव.

तत. शुभलग्ने प्रमारजेत पृथ्वीराजाय साहाय्यविधानपारितोषिकमिव. मूर्त युद्धयशइव. खड्गार्जिता विजयश्रियमिव ता लावण्यखनिमिच्छिनीकुमारी समर्प्य कृतकृत्यो बभूव. पृथ्वीराजोऽपि

तां सकलस्त्रीललामभूतां सौन्दर्यखनिं लब्ध्वाऽऽत्मानं कृतकृत्यं मन्यमानः कतिपयदिवसांस्तत्रोषित्वा स्वराजधानीं प्रययौ.

दिल्लीनगरवासिनस्तु स्वस्वामिनं समरविजयिनं स्वामिनीयुक्तं श्रुत्वाऽऽनन्दसागरपारगामिनो हर्षातिरेकेण कृत्स्नं नगरं सुशोभयित्वा नानाविधैरुपचारैः स्वराजनिष्ठां प्रीतिं च प्रदर्शयामासुः

पृथ्वीराजोऽपि स्वराजधानीं प्रविश्य स्वप्रजानां स्वस्मिन्नकृत्रिमं निरतिशयं प्रेम वीक्ष्यात्मानं धन्यममन्यत.

चतुर्थो गुच्छः ।

१ पद्मावतीपरिणयः.


२ महोबाधिपेन समं कलहोद्भवः.

३ पृथ्वीराजस्य महोबाराज्याक्रमणं

४ युद्धं महोबाधिपस्य पलायनं.

५ महोबाराज्ये स्वाधिकारः.

(१)



एकदा पृथ्वीराजे स्वमन्त्रिभिः सम विविधानि राज्यकार्याणि कृत्वा विश्रान्त्यर्थ राजोपवन प्रविश्य कस्याचिन्महत्तमृताकुरशालिन सहकारस्याधस्तात्स्थिते सत्यकस्मादतिमनोहर शुक स्वचंचुविधृत पत्र तस्य पुरस्तादक्षिपत्. दिल्लीपतिरपि विस्मितस्तदुद्घाट्यापठत् - तच्चेदं ---

सकललोकपालक ! नृपतिकुलतिलक ! शत्रुकण्ठनालविदारणमृगेन्द्र ! दिल्लीपते ! मामसहायामपरिणिता त्वद्गुणानुरक्ता त्व-

पुरुषं पितरं मन्यमाना पूर्वस्या दिशि वर्तमानस्य समुद्रशिखरराजधानीकस्य यदुकुलोत्पन्नस्य विजयसुरनाम्नो भूपस्यैकाकिनी पद्मावती कन्यामवेहि. अह च विविधदेशपर्यटनतत्पराणा वन्दिजनानां मुखात्संचरन्तीं तव शारदज्योत्स्नासहचरीं कीर्तिं निशम्य संजातप्रेमोदया त्वामेव वरीतुं निरचिनवम्. तद्यदि दीनकृपालुता स्यात्तदा त्वन्मार्गनिहितनेत्रां मा रुक्मिणीं यशोदानन्दन इव सत्वरमागत्य गान्धर्वविवाहेन परिणीय गृहीत्वा गच्छ. नचेदहमचिरादेव भारभूतानिमान् प्राणान्विसृज्य स्वर्गे त्वदागमन प्रतिपालयन्ती स्थास्यामीति.

पृथ्वीराजश्चेमा प्रणयपत्रिकामनुवाच्य सन्तुष्ट 'सत्वरमागच्छामि' इत्यर्थबोधक प्रत्युत्तर लिखित्वा तस्यैव शुकस्य मुखे निधाय त प्रेषयत्. सोऽपि च गत्वा स्वस्वामिन्यै तत्पत्र ददौ.

अथ पृथ्वीराजो महत्या सेनया सम तस्य विजयसुरस्य राजधानी समुद्रशिखरनगर ययौ. ततश्च तत्र पद्मावती गान्धर्वविवाहेन परिणीय प्रतिनिवर्तमानो मार्गे पूर्व जितेन गिझनीश्वरेण शहाबुद्दीननाम्ना यवनाधिपेन सह महायुद्ध व्यतानीत्. तस्मिन्युद्धे ते महमदीया यवना अतिक्रूरा विकरालरूपा सचारिणस्तालवृक्षाइव क्रव्यादा अतिक्रूराणि कृत्यान्यकुर्वन् तथापि लोकोत्तरशौर्या क्षत्रियश्रेष्ठा. पृथ्वीराजसैनिकास्तान् सर्वानपि यवनान्विजित्य कादिशीकाश्चक्रुः. स तु गिझनीश्वरो धृष्ट शहाबुद्दीन स्वय पुनरपि जीवग्राह गृहीतः पृथ्वीराजेन कारागृहे स्थापितोऽष्टसहस्रसंख्याकानश्वान्वितीर्य पुनरप्यात्मानं मोचयामास. पृथ्वीराजश्च विजयश्रिया गृहगा लक्ष्म्या पद्मावत्या समाश्लिष्ट स्वराजधानी ययौ.

(२)

पृथ्वीराजे महममदेन शहाबुद्दीनघोरिणा सह युद्धमाने तदी- य केचन सैनिका इतस्ततो विकीर्णा विस्मृत्यान्यमार्गेण प्रवसन्तो भ्रान्त्वा चन्देलप्रान्तस्य राजधानीं महोबानगरं प्राप्ताः. ते च श्रान्ता विश्रान्त्यर्थं राज उपवनं प्रविष्टास्तदधिकृतेन निषिद्धास्त दुपवनं प्राविशन्. तस्याराममपालकस्य पत्नी भर्तृवधदुःखाकुला सर्वं वृत्तं राज्ञे परमालाय न्यवेदयत्. परमालराजश्च स्वसेवकवचनेन सत्वरं ऊदलनामानं स्वसामन्तमाहूय तेषां प्रमत्तानां सैनिकानां शासनायादिदेश. सोऽपि स्वामिनियोगमनुसृत्य नानाकष्टं सर्वेषां तेषां शिरश्छेदमकरोत्.

परमालराजस्तु कृतज्ञपरिवृतस्तं विजयशालिनं कृतकार्यं सेवकमभिनन्द्य तस्य सुन्दरमश्वमयाचत. तस्योदलस्य ‘ अलह ’ नामा बन्धुरासीत्. स च जात्या क्षत्रियः स्वाश्वयाचनेनात्मनोऽपमानं मन्यमानो मातरमापृच्छ्य तां याचनां निषिषेध. राजा च स्वयाचनां निषिद्धां वीक्ष्य कुपितस्तौ द्वौ बन्धू स्वराज्यादत्यवासयत्. तावपि शूरौ सर्वस्यास्य राज्ञो राज्येऽवस्थानापेक्षया सुराज्येऽवस्थानमुचितमिति मत्वा कनोजाधिपस्य गुणग्राहिणो जयचन्द्रस्य राज्यमाजग्मतुः. राजा जयचन्द्रोऽपि श्रुततत्कीर्तिस्तौ सादरमानीय स्वराजसभायां परं प्रतिष्ठापदेऽस्थापयत्. तावप्यानन्देन तमसेवेताम्.

अथ पृथ्वीराजः स्वदूतमुखान्महोबाधिपस्य स्वसेवकशिरश्छेदरूपं दुष्कर्म निशम्य सततमस्य प्रमत्तस्य महोबाधिपस्य ... ॥

पृथ्वीराजस्तथापि यथाशक्ति प्रकटितशौर्या हताः स्वर्गं लप्स्यामहे. यदि च कोऽपि तेन पृथ्वीराजेन समं योध्दुमस्मत्सामन्तेषु न शक्नोति तदाऽहमेकाकीतो निर्गत्य तेन समं युध्वा पुण्यां गतिं प्राप्नुयाम् ? इत्यवदत्.

युवराजस्य कोपकलुषमुत्तेजकं वाक्यं निशम्य समाविष्टपौरुषाः प्रकटितशौर्यभावास्ते सर्वेऽपि सामन्ताः स्वस्वसैन्यं गृहीत्वा पृथ्वीराजेन समं योध्दुं मतिमकुर्वन्. तेषु च परमालसामन्तेषु प्रमुखाः मलखान,अरिसिंह,वरसिंह,नरसिंह,जयसिंहनामानः पंच सामन्ता आसन्. तेच स्वामिकार्यार्थं स्वप्राणानपि तृणीकृत्य स्वसेनां गृहीत्वा पृथ्वीराजेन समं योध्दुं प्रातिष्ठन्त. अचिरादेव ' सिरसवा ' नाम्नो ग्रामस्य समीपे कृतनिवासां पृथ्वीराजसेनामालोच्य महता त्वेषेण तामाक्रम्य युद्धं प्रावर्तयन्त.

अस्मिन् युद्धे उभयपक्षसामन्ता व्यक्तिशोऽयुध्यन्त. परमालपक्ष्यो मलखानः स्वशत्रोः पक्ष्यं कयमासप्रधानमाचक्राम. एवमेव पृथ्वीराजपक्षीयश्चन्दपुण्डीरः स्वप्रतिस्पर्धिनं नरसिंह, चामुण्डरायश्च प्रतिपक्ष्यं जयसिंहं महता सावधानेनाचक्रमतुः. ते सर्वेऽपि स्वामिभक्ताः स्वस्वामिकार्यसिध्यर्थं परां काष्ठां चक्रुः.

एवं प्रवृत्ते प्रलयकालसहोदरे, भयंकरसिंहनादसकलितधनुष्टंकारघोषबधिरितजनश्रवणपुटे, यमलोकस्थकारागारसदृशे संग्रामे बहवः शूरा वीराः छिन्नकण्ठनालप्रवहद्रुधिरधाराभिर्मृत्युलोके परम-

त्यानेयौ. तौ च यदि प्रत्यागमिष्यतस्तदाऽवश्यमस्मास्तथैव राज्य कृत्स्नमपि रक्षिष्यतः. अन्यथाऽशक्यमेव राज्यरक्षणमिति जगाद.

राजा परमालस्तु मन्दधीरनन्यगतिकत्वेनेदं स्वपत्नीभाषणमंगीकृत्य पृथ्वीराज मासद्वयपर्यन्त युद्धशान्त्यर्थमयाचत. सोऽपि च जात्या क्षत्रियस्तस्य विज्ञप्तिमंगीकृत्य मासद्वय तूष्णीमतिष्ठत् अत्रान्तरे परमालराजः स्वाश्रित चतुर जनकनामान बन्दिन तयोः सामन्तयोरानयनाय कनोजाधिपस्य जयचन्द्रस्य समीपे प्रेषयामास. सोऽपि स्वामिभक्तस्तयोरन्तिक गत्वा सखेद--सामतशिरोमणी' यदाप्रभृति राज्ञा दुर्जनवचन श्रुत्वा युवा राज्यान्निसारितावित्यशृणोद्देवी तद्दिनमारभ्य रात्रिदिव नेत्रकमलाभ्यामश्रूणि विसृजति तद्यदि युवा प्रत्यागत्य महोद्यानगरमलंकरिष्यथस्तदेव राज्ञी सन्तुष्टा भविष्यति' इत्यगदत्.

तावपि----अस्मत्पूर्वजैस्तथाऽस्माभिश्च ये खलु पराक्रमा कृतास्तेषामिद देशनिर्वासनरूप पारितोषिक राज्ञा परमालेन वितीर्ण. अस्माभिश्च तत्परमानन्देन गृहीतमिति सकोप प्रत्युत्तरयामासतुः. चतुरो जनकोऽपि तयो कोप योग्यमेव मन्वान पुनरपि चातुर्येण तयो मनसी स्वानुकूले अकरोत्.

अथ तौ सामन्तबन्धू परमालराजस्य विज्ञप्ति स्वमात निवेदयामासतु'. साऽपि वीरमाता पश्चात्तापप्रदर्शक राज्ञः पत्रमनुवाच्य संजातदयाभावा स्वपूर्वजै सयत्न रक्षितस्य परमालराज्यस्य

वान्यथा.' इदं न कस्याप्येकस्य मानवस्य चरितं किन्तु सर्वोऽपि संसार एवात्र संक्षेपेण लिखित इति नूनं पठित्वा वदेत ! एतस्य चरितस्य पठनेन जीवत्सु बलाढ्येषु क्षात्रियकुलेषु कथं महमदीया अत्र समागत्य भारतवर्षमजयन् अस्माश्चेदृशीं दुरवस्थां प्रापयन्निति सम्यगाजस्येन पाठका अवगच्छेयुः, तदाऽहमात्मानं कृतार्थं मन्ये. अन्ते च सर्वानपि वो देशबान्धवानत्र दृष्टिक्षेपाय सविनयं विज्ञप्य विरमामि.

(पुणे नगर)
श्रीपादशास्त्री.

भीतिनिन्दलस्तेन सह मध्यातु मनो व्यधात्. स्वस्वामिन सविविधान-मानस समीक्ष्य तौ सामन्तबन्धू राजपुत्रो ब्रह्मजिच्च पर निषिषेध. राजाऽपि जनलज्जापरिहाराय कथमपि तत्रातिष्ठत्.

ततश्च भेरीपटहढक्कादिवाद्यघोषपुर सर तयो पृथ्वीराजमहोबा-धिपयोर्घोर युद्ध प्रावर्तत. पृथ्वीराजश्च स्वसेनाधिपत्ये स्वपितृव्यं नानायुद्धविजयशालिन शूर कन्हचव्हाण स्थापयामास. अचिरादेव स वृद्ध कन्हो महोबाधिपस्य सेना तथा सामन्तबन्धूद्वयेन समं समागता कनोजाधिपसेना सहसा आचक्राम प्रावर्तत च घोर समर. तत्र नीलधररायो नाम पृथ्वीराजसामन्त परमशूर स्वप्रतिपक्षीय तालखापठाणनामान शत्रुसेनापतिं जघान. तस्मिन्निहते सर्वोऽपि शत्रुसेना सर्वत पलायनपरा बभूव. स्वसेना पलायनोन्मुखीमालोच्य क्रोधान्धो 'लाखनसी'नाम महान् शूरो महोबाधिपसामन्त सर्वानपि सैनिकान् प्रोत्साहयन् अग्रेसरो भूत्वाऽयुध्यत. परमचातुर्येण युध्य-मान त लाखनसीसामन्त गदाप्रहारेण पृथ्वीराजपक्षीय कश्चन साम-न्तश्चूर्णितोत्तमाङ्गमकरोत्. भीष्मइव महाप्रतापी कन्हचव्हाण एकाकी शत्रुपक्षीयैस्त्रिभि शूरै सामन्तैः सम युध्यमानस्तान् सर्वानपि स्वर्गम् गमयामास. तदानीं तौ सामन्तबन्धू प्राय स्वपक्षीयान् समरभूमि-पतितान् वीक्ष्य सततौ कुङ्कुमाक्तवस्त्राणि धृत्वा महताऽनन्देन समर-मवतेरतु. तौ च समराङ्गण प्रविश्य महाप्रतापिन पृथ्वीराजपक्षीयं सजमरायनामान सामन्तमाक्रम्यावधिष्टाम्. ततश्च उदलनामा सामन्त कन्हचव्हाणमाक्रम्य घोर युद्ध प्रावर्तयत्. उदलसामन्ते । १५
कन्हचव्हाणशिरसि प्रहार कुर्वति सति त प्रहार दैवादागतः १५

[illegible] सर्वाणि [illegible] नापण [illegible] रङ्गो रत्नान्तर जगाम

[illegible] परमार्दी [illegible] निष्कासितवान् [illegible] दीन [illegible] निष्कासितवान्

(५)

[illegible] युद्धं ... सञ्जाते [illegible] वन प्रति गते [illegible] नामन्ताश्च [illegible] तान् शरणागतान् वीक्ष्य कृपया रत्नपाल परिहरन् पृथ्वीराजसेनापति [illegible] युद्धव्यापाराद्विवर्तयामास ते सर्वेऽपि [illegible] स्वात्मीयान् बान्धवानन्वेषयामासु पृथ्वीराजस्तान्तु स्वस्वामिनमनभिलक्ष्य चिन्तातुरा महता प्रयत्नेन शोधयन्तस्ते [illegible] विनिभग्नाघातजनशरीरसैनिकसमुदाय-पतितं [illegible] लब्धवन्त स्वामिन पृथ्वीराजस्येदृशी दशामवलोक्य शोकाकुला सत्वर तमुपचार्य प्रकृतिमापयितु [illegible] च तत्र शीघ्रमेव ययु. चामुण्डरायोऽपि कलिञ्जरदुर्गं जित्वा परमारराज बन्दीकृत्यानयत्. तस्माच्च दुर्गा-दगणित द्रव्यराशि.


ततश्च महोबानगर महोत्सवेन प्रविश्य राजा पृथ्वीराजो दुष्टाना शासनार्थं [illegible] कृतपरिश्रमाणा सेवकानामनुग्रहार्थं महती

राजसभां चकार. तत्र चोच्चं सिंहासनमासीनः सर्वान् समस्तानुद्दि-
श्येदमभाषत.

भो भो सभ्याः सामन्ताः शूराः सैनिकाः ! वयं चेशकृपयाऽस्मिन् महायुद्धे विजयश्रिया समलङ्कृताः. ये खलु राजानः स्वनिर्विशेषं स्वानुयायिषु वर्तन्ते तेऽवश्यमेव यस्मिन् कस्मिन्नपि कार्ये यशस्विनो भवन्त्येव. यो हि राजा स्वसुतनिर्विशेषं स्वाश्रितान् पालयति तस्मिन्नेऽपि निर्विशेषं प्रेम कुर्वन्ति. अहं चास्मिन् युद्धे ब्रह्मजिता राजकुमारेण सह युयुधे. तत्र मदीयप्रहारेण पराक्रमी राजपुत्रः स्वर्गमलभत. तदीयप्रहारेणाहं मूर्च्छां. मूर्च्छितश्च मृतसैनिकसमुदायेऽपतम्. अत्रान्तरे महानेको गृध्रो मां मृतं मन्यमानो मांसलोलुपो मदक्षिणी विदारयितुमचेष्टत. तं भयानकं गृध्रं वीक्ष्य प्रतिकारासमर्थः केवलमहमीश्वरमेव प्रार्थयम्. अत्रान्तरे मम समीपं एव पतितः सामन्तः सजमरायः शस्त्राघातव्याकुलस्तस्माद्गृध्रान्मामानिष्ट शक्नुवन् स्वदेहमांसखण्डं छुरिकया निकृत्य तस्मै गृध्राय पुरस्ताच्चिक्षेप. सोऽपि अनायासप्राप्तं तं खण्डं गृहीत्वा कृतकृत्यो ऽन्यत्र गतो. सजमरायश्च स्वार्जितान् पुण्यलोकान्. सभ्याः ! अहं यावज्जीवं तस्य पुण्यश्लोकस्य सजमरायस्येदं कर्म न विस्मरामि प्रत्युत तं प्राणदातारं दैवतं पश्यामि. अस्तु. जयं च मदीयमपि परजयं स्वाश्रितौ अल्हउदलनामानौ सामन्तौ निर्गत्य युद्धमार्गं सन्तीलापदं केन. यो हि राजा कार्याकार्यं न विजानाति तस्य सेवका अपि स्वतन्त्रमतिना न सम्यक् कार्याणि कुर्वन्ति. तस्मिन् राज्येऽन्-

अनधिकारी तदेनं निष्कास्य परमचतुरं शौर्यादिगुणसमन्वितं मदीयं सामन्तं पज्जूनकच्छवाहं स्थापयामि. स च न्यायेन प्रजाः पालयिष्यति. उक्तं च पृथ्वीराजस्य भाषणं निशम्य परमाल्हादं [illegible] कुलोऽभूत् सर्वं च प्रजाजनास्ताः [illegible] पृथ्वीराजमस्तुवन् [illegible] गमनगृ[illegible] पृथ्वीराजः प्रजनाम

ततश्च महोबानगरे [illegible] स्थापयित्वा [illegible] दिल्लीनगरं प्रति प्रस्थितः. प्रविश्य च तत्प्रजाजनैः [illegible] पर सुगमतया महाराज पृथ्वीराज .





पञ्चमो गुच्छः ।

१. कनोजाधिपस्य राजसूययज्ञविधानेच्छा.
२. पृथ्वीराजस्य तत्र प्रातिकूल्यम्.
३. युद्धं. कनोजाधिपस्य पराभवः.
४. कनोजाधिपकन्यायाः संयोगितायाः पृथ्वीराजेऽनुरागः.
५. कनोजाधिपस्य तस्यामप्रीतिः प्रतिबन्धश्च.

[१]

[illegible]

सौधमघैर्विभूषिता पञ्चदशक्रोशायामा कनोजनाम्नी सुविख्याता नगरी राजधान्यासीत्. तस्या च वसन् स जयचन्द आत्मान स्वर्गाधिपादपि श्रेष्ठममन्यत. तस्य मन्त्रिमण्डलमपि राज्यकर्माणि कुशल स्वमतिप्रभावेण बृहस्पतिमपि समतिचक्राम. कोशाश्च सततमागतै प्रजाकरद्रव्यैः, सामन्तप्रदत्तैरुपायनै, परिपूर्णा एवासन् सेना च युद्धकुशलै सेनापतिभिः सुशिक्षिता सर्वशस्त्रास्त्रशालिनी सङ्ख्ययाऽशीतिलक्षपरिमिताऽसीत्. यदा च स कनोजाधिपो राजसभाया सिंहासनमलमकरोत्तदा समस्ततारागणमण्डितस्य चन्द्रस्य शोभामपहरति स्म.

एव प्रतापी स कनोजाधिपो जयचन्द प्रवर्धमाना शुक्लपक्षज्योत्स्नासहचरीं दिल्लीपते पृथ्वीराजस्य कीर्तिं निशम्य संजातद्वेषस्तदपमानमति किमपि कारणमचिन्तयत्.

अत्रान्तरे मध्यान्हसमये पुराणकथनार्थं विद्वान् पौराणिक समाययौ. राजाऽपि नित्यक्रमानुरोधेन पुराण श्रोतुमतिष्ठत्. तस्मिन्दिने स पौराणिको महाभारतान्तर्गत राजसूययज्ञप्रकरण सम्यगकथयत्. तत्र च नानाविधदेशाधिपैर्विहितानि सेवाकर्माणि निशम्य राजा परमतुष्यत्. रात्रौ च स्वामात्य सुमतिनामानमाहूय जयचन्दोऽवदत्-मन्त्रिवर! दिल्लीपतिः पृथ्वीराजो नानाविधान् देशान्विजित्यापार यशो लब्ध्वाऽस्मान् न्यूनीकर्तुमिच्छति. तत्केन प्रसगेन स आक्रम्य पराजित्य स्वसामन्तता प्रापणीय इति चिन्तामग्नोऽहं मध्यान्हे राजसूययज्ञविधानमश्रौषम्. तदह राजसूययज्ञं विधास्यामि.

चेतरराजवत्सेवार्थमाहूत पृथ्वीराजो यदि नागच्छेत्तदाऽस्माभि सहसाऽक्रम्य स सुजेयो भविष्यति. तदत्र किं भवतोऽनुमतमिति. स च मन्त्री स्वस्वामिनो राजसूययज्ञविधानेच्छां निशम्य पर विस्मित.—स्वामिन्! अस्मिन् कलियुगे नास्ति कस्यापि राज्ञो राजसूयविधानाधिकार·. स तु यागराजो धर्मराजप्रभृतिभि प्राचीनै राजर्षिभिरेव कर्तव्य . नास्मादृशैर्लेभिसकुलैर्मानवाधमैः! तद्विहाय राजसूययागविधानेच्छां पृथ्वीराजाक्रमणे वयमन्यत्कारणमन्वेषयिष्याम इत्यगादीत

जयचन्द्रस्तु महामानी स्वमन्त्रिण इद प्रतीप भाषणं निशम्य क्रुद्धस्त प्रत्यगदत—रे मतिमूढ ! नास्ति कस्यापि क्षत्रियराजस्य कलियुगे राजसूयाधिकार इति वदता त्वया कथमिद कलियुग ज्ञात ? अस्ति किं मदीये राज्ये कलियुगस्य लक्षण किंचित् ? अह [illegible] धर्मराज इव न्यायेन सर्वान् पालयामि. [illegible] प्रजा अपि [illegible] धर्मेण [illegible]. [illegible] प्रजाजना [illegible] [illegible] लौकिक [illegible]. [illegible] [illegible] मदीया [illegible] [illegible] [illegible] विद्वांसो [illegible]. [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible]

साधारणाअपि जना दृश्यन्ते किमुत सेनाबलसमन्विता राजानः! पूर्वं तु मनसैव पापविमुखा सदाचरणपरा जना आसन्, अधुना राजदण्डभयेन क्वचित्तथा वर्तमानाअपि मनसा पापाचरणोत्सुका एव. पूर्वं परमेश्वरभिया परराज्यानि नाक्राम्यन् भूपालाः, अधुना तु पराभवभीत्या. तदस्मिन् स्पष्टतरे कलियुगचिन्हे परिदृश्यमाने सत्यपि यदि स्वामीदं सत्ययुगमेव मन्यते तदा केवलमिदं वाक्यं राजाज्ञेत्येवास्माभिः स्वीकर्तव्यमिति.

कनोजाधिपो जयचन्दस्तस्य सुमतेर्भाषणं सत्यमिति मन्वानोऽपि मानधनतयाऽहं राजसूययज्ञं करिष्याम्येवेति प्रतिज्ञाय सर्वान् स्वराज्ये तथाऽघोषयत्. मंत्र्यपि स्वामिभक्तो राजाज्ञापालनं स्वकर्तव्यं मन्वानः स्वाधिकारकार्यमकरोत्.

अचिरादेव राजा जयचंदः सर्वान् भारतवासिनो भूपालानुद्दिश्येदं प्रसिद्धिपत्रं निरकासयत्.

सर्वे भारतवासिनो भूपालाः! कनोजाधिपतिर्जयचन्दोऽहं राजसूययागविधानेच्छुरस्मि. तदस्मिन् यागे नियुक्तानि स्वस्वकर्माणि विधातुं सर्वैरपि युष्माभिरत्रोपस्थातव्यं. ये खलु बलमदाद्वोन्मादाद्वा नोपस्थास्यन्ति तानहमचिरादेव प्राणदण्डेन वा राज्यहरणदण्डेन वा, देशनिर्वासनदण्डेन वा, येन केनापि क्रूरेण दण्डेन योजयिष्यामीति. तदिदं प्रसिद्धिपत्रं दूतद्वारा समागतं वीक्ष्य सर्वेऽपि भारतभूपाला कनोजाधिपस्य सामर्थ्यं जानन्तः सत्वरमेव ससैन्यं कनोजनगरमागताः

जयचन्दस्य चरणारविन्दं प्रणेमुः. तदानीं जयचन्दस्य राजधानी कनोजनगरं द्वितीयं भूतलमिवाशोभत. राजापि सकलसामन्तमंडलमध्यवर्ती नक्षत्रगणपरिवेष्टितः पूर्णिमाशशांक इव.

अथ सर्वां राजसूययागसामग्रीं परिपूर्णामवलोक्य तत्प्रारंभचिकीर्षुर्नृपो जयचन्दः केवलं दिल्लीपतिं पृथ्वीराजं तथा चितोडाधिपं समरसिंहमनागतं वीक्ष्य कोपाकुलः पुनरपि पृथ्वीराजाय दूतद्वारा संदेशं प्रेषयत. स चेत्थम्.—

दिल्लीपते! पृथ्वीराज! अस्माभिस्तु राजसूययागः समारब्धस्तदर्थं निमन्त्रणमपि पूर्वमेव प्रेषितं. तदनादृत्य नागतो भवान्. तत्तु [illegible] यदि तुभ्यं स्वीयाः प्राणाः प्रियाः स्युः, यदि [illegible]; तदा सत्वरमागत्यैतस्मिन्नवसरे सेवस्व. [illegible] [illegible] निर्गमिष्यन्ति. इति

[illegible]

[illegible]

[illegible]

मुख्यविषयानुक्रमः—

१ गुच्छ ... ... १—११

२ गुच्छ ... ... १२—२३

३ गुच्छः ... . २४—३४

४ गुच्छः ... ... ३५—४७

५ गुच्छ ... . ४८—६४

६ गुच्छः ... ... ६५—७६

७ गुच्छः ... ... ७७—८८

८ गुच्छ ... ... ८९—१०४

९ गुच्छः ... ... १०५—११९

१० गुच्छ ... ... १२०—१३९

११ गुच्छः ... ... १४०—१५७

१२ गुच्छ ... ... १५८—१८६

साक्षान्नारायणाय कृत्स्नेयं भू: प्रदत्ता. त्रेतायुगे रामचन्द्रेणाश्व याग कृतस्तत्र साक्षात्कुबेरएव तत्साहाय्यार्थमागत:. द्वापरयुगे युधिष्ठिरेणाय याग कृतस्तत्र साक्षाद्देवकीनन्दन सहाय आसीत्, अलब्ध्वा चेदृश साहाय्य अकृत्वा च पौरुषकर्माणि अजित्वा च समग्रा पृथ्वीं केवलमह राजसूययागं करोमीति कथनं नाम बालिशभाषित. वस्तुतस्त्वस्मिन् समग्रभारतवर्षे यदि कश्चन राजसूययागविधानेऽधिकार्यस्ति चेत् सोऽहमेव. मया खलु परमक्रूरो महम्मदीयधर्मानुसारी गिझनीपति शहाबुद्दीन त्रि पराजित:. बलोन्मत्तो विख्यातो भीमदेवो नाम गुर्जराधिपतिरपि जित्वा राज्यान्निर्वासित. दुराचारी महोबाधिप: परमालोऽपि मया लीलयेव शासित. सर्वेऽपि स्वल्पबला भूपा बलिभिरन्यै: नृपैराक्रान्ता मत्त एव साहाय्यं याचन्ते सकलबन्दिजनमुखकमलसंचारिणीं चंद्रपुण्डरीकसहचारिणीं मदीयां कीर्तिं निशम्य न केवलं दुर्वृत्तनृपप्रजा एव मां स्वाधिपं विधातु कामयन्ते किंतु विविधभूपालकन्यका अपि. तदेव सकलगुणमण्डितोऽप्यहमात्मान राजसूययागाधिकारिण न भावये तदा त्वादृशान् क्षुद्रान् जन्तून् कथ भावयिष्य इति त्वमेव विचारय. तथदीदृशमपमानकारकं सदेश पुनरपि प्रेषयिष्यसि तदाऽस्य मत्कण्ठनालविदारणलब्धख्याति. पृथ्वीराजहस्तकमलविराजमान: खड्गो न मर्षिष्यतीति जानीहि इति प्रत्युत्तरं प्रेषयामास.

मानधनतामग्रेसरो जयचन्द्रो दूतस्समानीतं तत्प्रत्युत्तरं समाकर्ण्य कोपसंतप्तो रक्ततरनयनयुगलस्तस्मिन्नेव क्षणे सर्वानुद्दिश्यैव ज-

"समुपस्थितेषु भूपालेषु य कोऽपि मा सेवितुमिच्छति चेत् स प्रथमं पृथ्वीराजं बन्दीकृत्यात्रानयतु. अहं च तं सर्वथा साहाय्ययिष्यामीति."

अनवसित एवास्मिन् जयचन्द्रवाक्ये तदीयः कनीयान् बन्धुर्बालुकराय सत्वरमुत्थाय राजसिंहासनं नमस्कृत्य-अहं हि तं मदोन्मत्तं पृथ्वीराजं पराजित्य बन्दीकृत्यात्रानेष्यामि-इति प्रतिजज्ञे. जयचन्द्रोऽपि स्वभ्रातुर्बालुकरायस्येदं भाषणं निशम्य सन्तुष्टस्तत्साहाय्यार्थं खुर्शानखानवदातमीरनामानौ द्वौ सामन्तौ षष्टिसहस्रपरिमितां सेनां च दत्वा स्वकार्यविधानाय प्रेषयामास. तावत्पर्यन्तं राजसूययागद्वारे पृथ्वीराजस्य सुवर्णमयीं प्रतिमां स्थापयित्वा पृथ्वीराजो द्वारपालः कृतः. बालुकरायोऽपि स्वकार्यं शीघ्रं विधातुं त्वरमाणो राजसूययागे विघ्नविधानार्थं समागमिष्यतः पृथ्वीराजस्य पराजयाय मार्गे खोकंदनगरसमीपे कृतस्कन्धावारोऽवसत्. दिल्लीपतिः पृथ्वीराजः सर्वत्र प्रसृतचारमुखेन यागद्वारे स्थापितां स्वप्रतिमां तथा स्वशासनार्थं प्रेषितं बालुकरायं च निशम्य क्रुद्धः सत्वरमेव कृत्स्नं सामन्तमण्डलं च मन्त्रिमण्डलं चाहूय किंकर्तव्यमिति विचारयामास. तत्र केचनावदन्' नास्ति सम्प्रति विचारस्यावसरः. सत्वरं गत्वा स मत्तो जयचन्द्र आक्रम्य पराजेय इति.

अन्येतु-अशक्यमिदं जयचन्द्राक्रमणं. यतः स स्वीयां महतीं सेनां पालयन् नूतनागतानां विविधनृपाणां सैन्यान्यपि बिभर्ति. तत्कथ-

मेधाविना स्वामिना स आक्रमणार्हः तस्मादन्यया कयापि युक्त्या तस्य राजसूययज्ञे विघ्नः कर्तव्य इत्यगदन्.

पृथ्वीराजस्य परमचतुर कुशाग्रमतिरमात्य कयमासोऽब्रवीत्-स्वामिन् यत्खलु क्षत्रियकुलोत्पन्नैरवश्य तत्करणीयमेवेति नः पूर्वजैराचरितो धर्म, परन्तु केवलं पतङ्गवत् प्रज्वाले वन्हौ निपत्य मरणमपि न श्रेयः. तदधुनाऽस्मत्स्वामिशासनाय समागतो जयचन्दबन्धुरेवाक्रम्य हन्तव्य. तस्मिन्निहते राजसूययज्ञोऽपि प्रतिबद्धो भविष्यति. तत ऊर्ध्व जयचन्द स्वयमेव योद्धुमागमिष्यति चेत्तदा वयमपि द्रक्ष्याम इति

दिल्लीपति पृथ्वीराज सर्वं मन्त्रिमण्डल च तस्य कयमासप्रधानस्य भाषणमाकर्ण्य तथैव कर्तु निर्णयौ.

(३)

अथ पृथ्वीराजः सर्वान् स्वसामन्तानाहूय सर्वा सेना सन्नाहयामास. तदाधिपत्ये च स्वपितृव्य कन्हचव्हाण नियुज्य महता सावधानेन वालुकरायाक्रमणार्थ चचाल सा च सेना सप्ततिसहस्रपरिमिता शनैः शनैर्दिल्लीनगरान्निर्ययौ. तदानीं च सर्वेऽपि सज्जना ईश्वर विजयार्थ प्रार्थयन्त. तेषामाशीर्वादान् गृहीत्वा कन्हचव्हाणो महतोत्साहेन खोक्दनगरमनुलङ्घ्य चचाल.

वालुकरायोऽपि ज्ञातवृत्तान्त स्वसेना गृहीत्वा पृथ्वीराजेन सम

कनोजाधिपो जयचन्द्रश्च भ्रातृवधदुःखाकुल संप्राप्तमरणाशौच कथमपि राजसूययज्ञं कर्तुं न पारयामास. तथा तदनुषंगिस्वकन्यायाः संयोगितायाः स्वयंवरं च.

(४)

वाचकाः! कनोजाधिपस्य कन्यायाः संयोगितायाः परिचयार्थं प्रथमतस्तद्वृत्तं लिखामि.

पुरा खलु हिमालये कश्चन् तपस्वी घोरं तपश्चचार. तदानीं तत्तपस्यार्भीतैर्देवैः काचन् देवांगना तत्तपस्याया विघ्नविधानार्थं प्रेषिता. सा च स्वनियोगमनुतिष्ठन्ती तेन क्रुद्धेन मुनिवरेण—'त्वं हि मर्त्यलोके कनोजाधिपस्य जयचन्द्रस्य कन्या भूत्वा विवाहसमये उभयकुलघातं करिष्यसि' इति शप्ता. साऽपि देवांगना स्वभाग्यं निन्दन्ती कनोजाधिपगृहे प्रादुर्बभूव. कनोजाधिपो जयचन्द्रोऽपुनस्तां सर्वांगसुन्दरीं कन्यां लब्ध्वा कृतकृत्यं मन्यमानः पुत्रवत् पालयामास. साऽपि चन्द्रकलेव वर्धमाना प्रतिदिनमधिकमेव लावण्यं वा पित्रोरनल्पमानन्दमजनयत्.

अथ समासन्नयौवनां दिव्यलावण्यखानिं स्वकन्यां संयोगितां जयचन्द्रस्तदनुरूपं वरमन्वेषयत्. समग्रभारतवर्षे ये खलु राजा-स्तदानीमासंस्तेष्वेकोऽपि तस्याः कन्यायाश्चरणयोस्तता नाभिन्.

दुःखीकरोति. विशेषतस्तु मनोभूः. एष च सकल्पजन्मा सहकारसपादितयुद्धसाधनो वसन्ते मत्त इव मां प्रहरति. परन्तु तथा गाढं मां न प्रहरति यथाऽहं दुःखमुक्ता स्वर्गवासिनी स्वामिनामागमनं प्रतिपालयन्ती स्थास्यामि. किन्तु सततं तद्वियोगाग्नौ पतिता यथा सम्यक् दुःखं भोक्ष्ये तथा शनैः शनैर्मर्माणि विध्यति. ततः सखि! यदि शक्यं तदा कथमपि मम प्राणप्रियमानीय सजीवय माम्. त्वां चाहं प्राणप्रदायिनीं देवतामिव मन्ये. अथ यद्यशक्यमिदं मन्यसे तदा कालकूटसदृशं त्वरितं प्राणहारि विषमपि मे देहि. तच्च पीत्वा शान्तस्वथाऽहं सुखभाक् स्यामिति.

सा च दासी तस्याः प्रलापतस्तन्मनोगतं प्रियकरं ज्ञात्वा कृतकृत्या शीघ्रमेवागत्य महाराजं कनोजाधिपं जयचन्दं सर्वमकथयत. स तु शिरसि वज्रेण हत इव नितान्तं विस्मितोऽभवत्. प्रथमं तु स तामेव दासीं मिथ्यावादिनीं मेने. परन्तु भूयोभूयः सशपथं बोधितः सत्यं मेने.

(५)

अथ तद्वृत्तं निशम्य दुःखसागरमग्नः स कनोजाधिपः स्वयमचिन्तयत्-अहमस्मि परमभाग्यः राजसूययज्ञं चिकीर्षुणा मया पृथ्वीराजविजयाय प्रेषितौ वीरौ बन्धुर्वालुकराय एव निहतः. इयं च सकलगुणमण्डिता मच्चारिणी रतिरिव सौन्दर्यशालिनी देवाग

[illegible]र्तीभूता ममैकाकिनी पुत्री संयोगिताऽपि तमेव कामयते. परन्तु तथा शोकेन किं स्यात्. यथाशक्ति मानवेन प्रयत्न करणीय फल तु दैवायत्त. तत्र दैव यदनुकूल स्यात्तदा स प्रयत्न सफलो भवति विपरीते तु विफल इति. इत्थं विचार्य तामेव दासी-[illegible]-ध्यानि त्वमसि परमचतुरा. त्वयैव महता चातुर्येण प्रकटीकृत[illegible] तस्याः मनोगत. साम्प्रत नु तस्य पृथ्वीराजस्य दोषदर्शनेन वा [illegible]नेन वा येन केनापि प्रकारेण तस्या मन पृथ्वी-[illegible]. यदि त्वमिद मदभिलषित करिष्यसि तदा [illegible] [illegible] स्वामिभक्ता [illegible] गया.

[illegible] संयोगितामनोरञ्जन-राजकन्या [illegible] [illegible] [illegible]

निष्टस्यापि संभावना. तस्मादहं वदामि पृथ्वीराजं विहायान्य एव कश्चन तरुणो राजपुत्रस्त्वया वरणीय इति.

सा च चतुरा सयोगिता सख्या इदं भाषणं निशम्यानुमितपितृहृदया स्पष्टमेवोत्तरं दातुमिच्छन्ती सहासमवदत्-सखि ' सत्यमेव त्वं मामनुकम्पसे. न कोऽपि मामीदृशमुपादिशत्. अहमपि तस्मात्प्रियतमात् मन्मनो निवर्तयितुं प्रयते परन्तु योग्यायोग्यपरीक्षाकुशलं तदेव ततो न निवर्तते. सर्वे हि जना लौकिकं वाऽलौकिकं वा विषयं मनसैव योग्यमयोग्यं वेति निश्चिन्वन्ति. तद्यदि निष्पापं मदीयहितकारि मनो मां तमेव योग्यं निबोधयति तदा परेषां का कथा.

यदवोचः पितैव भर्तुरपेक्षया श्रेष्ठ इति तन्न सम्यक्-यत इह जगति सर्वेऽपि जन्तवो यथा यदृच्छया समुत्पद्यन्ते तथैव मानवा अपि ' उत्पन्नाश्च बुद्धिमत्ताशालिनो जन्तवो मनुष्या भवन्ति. सर्वं हि मानवजातिकार्यं स्त्रीणां भर्तुः साहाय्येन, न स्वातन्त्र्येणेति शास्त्राणि वदन्ति. तत्कथय पश्वादिसाधारणजन्मदायिनोऽपेक्षया दुर्लभमानुषत्वप्रापकस्य भर्तुः श्रेष्ठत्वं नवेति.

यदगदः—मम पितुः प्रियकरविरोधित्वात्तेन सह युद्धप्रसंगे कदाचिदनिष्टमपि स्यादिति तत्क्षत्रियकन्यकानां साधारणमेव. अद्यावधि यानि खलु मत्पित्रा युद्धानि कृतानि तत्र च ये हताः क्षत्रियास्तेषां

स्त्रीणामपि का गतिरभवत्. तस्मात् क्षत्रियकन्यका ईदृशादानिष्टात् न बिभ्यति

मम त्वयं निश्चयः—यस्य कुले गृहीतं जन्म स पूज्यः पिता दुराचरणेन लोकापवादास्पदतां प्रापणीयः. अतः परं स्वजन्मनः साफल्यं स्वयमेव करणीयं न तत्र पितुरपेक्षेति.

सा च जडमतिर्दासी राजकन्याया इदं भाषणं निशम्य मूढा शनैः शनैः समागत्य सर्वं कनोजाधिपाय न्यवेदयत्. सोऽपि परं खिन्नः पुनः पुनरपि नानाविधैरुपायैस्तां तस्माद्व्यवसायान्निवर्तयितुं प्रयतमानोऽपि यदा न लेभे यशस्तदा रुष्टस्तां संयोगितां गंगातीरे नूतनं प्रासादं विरचय्य तत्रास्थापयत्. परितश्च नग्नखड्गधारिणो निरीक्षकान् स्थापयित्वा तदध्यक्षाय ' ममाज्ञां विना कोऽपि पुरुषो न प्रवेशनीयः ' इति समादिशत्. साऽपि राजकन्या संयोगिता नष्टेऽपि स्वातन्त्र्येऽग्निज्वा परमेश्वरे निहितभारा कथमपि कालप्रतीक्षां चक्रे.



षष्ठोगुच्छः ।

१ पृथ्वीराजस्य सहायरत्नानि.

२ चामुण्डरायस्य शस्त्रत्यागः.

३ कयमासामात्यस्य मृत्यु

४ गिझनीपतेः पुनः पराभव .

महापराक्रमी कनोजाधिपतिर्जयचन्द्रोऽपि येन राजसूययज्ञविधाने निर्जित स पृथ्वीराज कीदृशान् सहायानलभतेति निरूपयितु वयमुपक्रान्ता .

वाचका ! अतिबुद्धिमानपि राजा सहाय-साहाय्य विना कदापि लोक न्यायेन शासितुं न प्रभवति अनल्पा खलु जना जगतीतले नानाविधान् दुष्कर्मान् कुर्वन्तो जीवन्ति तांश्च कुमार्गतो निष्कास्य साधुमार्गे स्थापन

[illegible]

[illegible]

अथागतिः श्रीरामपुरोहित. स्वामिनियोगानुष्ठानाय शृंखलां गृहीत्वा चामुण्डरायस्य पुरत आजगाम. अथाकथयच्च त स्वामिनियोग. स तु प्रकृत्यैव धीर प्रशान्तान्तःकरणेन स्वामिनो नियोग श्रुत्वाऽवदत्-पुरोहितराज' त्वमितो गत्वा स्वामिन पृथ्वीराज वद-चामुण्डरायः पृच्छति स्वामिना शृंखलाग्रहणायाज्ञा प्रदत्ता. सा च स्वीकृताऽपि. परन्तु शस्त्रत्याग विना शृंखलाग्रहणमशक्य, तत्किं मया शस्त्र त्यक्त्वा शृंखला धार्या' त्यक्त शस्त्र चामुण्डराय. पुनर्नगृण्हातीति जानात्येव स्वामीति.

पृथ्वीराजस्तु तेन पुरोहितेन पृष्टोऽपि कोपप्रनष्टप्रज्ञ -नास्त्यावश्यकता तव साहाय्यस्य. त्वमद्यप्रभृति शृंखलामेव धारय-इति पुनरपि कथयामास. स तु स्वामिभक्तश्चामुण्डराय इम नियोग श्रुत्वा प्रहसन् परमादरेण शस्त्र निक्षिप्य लोहशृंखला हस्ताभ्यामुवाह. तद्वीक्ष्य सर्वेऽपि सामन्ता प्रजाजनाश्च पर दुःखाकुला पृथ्वीराज निनिन्दु

वाचका' यद्यपि पृथ्वीराज पर बुद्धिमानासीत्तथापि क्षत्रियाणा बुद्धेः रजोगुणप्रधानतया तस्या सर्व एव विकारा प्रबला भवन्ति. यथाहि तेषा प्रमादो भयकरस्तथैव कोपोऽपि. सत्वप्रकृतावपि यद्यपीमे विकारा जायन्त्येव तथापि सत्वस्य, अविचार्य कस्यापि कार्यस्यानिश्चयात्तेन न तादृशा हानयो जायन्ते. अतएव रजोगुणापेक्षया सत्वगुणस्य श्रेष्ठत्व अस्तु

[illegible]

[illegible] पतति
[illegible] बुद्धिरपि तस्य सन्मार्गे
[illegible] स पतनोन्मुखो भवति
[illegible] एव [illegible] जायन्ते. सदसद्विवेक
[illegible] न भवति. किं बहुना [illegible]
[illegible] अनिष्टमेव फलं लभते.
[illegible] समारूढस्तेन
[illegible] न करणीयः. यथा
[illegible]

दैवेन प्रचालितं संसारचक्रमारूढा वयमपि नीचोत्तमां गतिं लभामहे इति. अस्तु. प्रकृतमनुसरामः.

एकदा कयमासो राजकार्यविधानार्थं राजसभां गच्छन् मार्गेऽलौकिकलावण्यशालिनीं सुमनोहरलोचनां, मयूरपाशसमकेशपाशां, कुसुमगुच्छसमलंकृतधम्मिल्लां, अतिशुभ्रमल्लिकाकुड्मलसुन्दरदन्तावलिमनोहरवदनकमलां, लावण्यनिर्जिते चन्द्रकले इव हीरकमये कुण्डले कर्णाभ्यां वहन्तीं, अत्युन्नतकुचयुगललुण्ठन्मुक्ताहारहृदयधारिणीं, कामातुरेणेव नपुंसकेनापि कौशेयवस्त्रेण समाश्लिष्टगात्रां, ताम्बूलसेवनरक्ततराधरोष्ठनिपतद्दिव्यसुधां भूमिगतामुर्वशीमिव गवाक्षवातायनास्थितां काञ्चन गणिकामपश्यत्. तस्मिन्नेव क्षणे स विद्वानपि विचारशीलोऽपि कामदेवस्य वशो बभूव. स तु कथमपि जनलज्जाभीतो महता प्रयत्नेन चित्तमवधार्य राज्यकार्याणि विधाय स्वगृहमागत्य परमस्वस्थचित्तो बभूव. स च तस्या गणिकाया वृत्तं ज्ञातुकामः स्वीयां विश्वस्तां दासीं प्रेषयामास. सा च निभृतं संवमन्विष्य तां पृथ्वीराजस्य गणिकां कर्नाटकीनाम्नीं निवेदयामास.

अमात्य. कयमासो राजनीतिचतुरो राजगणिकाभिलाषमन्याय्यं जानन्नपि काममूढचेतास्तस्याः समीपे गन्तुं मनश्चक्रे. नमोऽस्तु तस्मै प्रबलाय कामवासनायै. या च विद्वांसमपि वशीकृत्य स्वदासं करोति. अस्तु. ततश्च स कयमासः पुनरपि स्वानुरागबोधिकां पत्रिकां तदन्तिके प्रेषयामास. साऽपि जात्या गणिका राजाश्रिताऽपि मूलस्वभावमविस्मरन्ती तदनुगुणमुत्तरं प्रेषयामास. कयमासश्च तल्लब्ध्वा स्वां

[illegible] च मतिं [illegible]

[illegible]

[illegible] पक्षुद्गेण [illegible] सन [illegible] [illegible] सुरम्य [illegible] [illegible] प्रागृहीत्वा [illegible] [illegible] [illegible] अभिसारि [illegible]- [illegible] मन्दिरं, [illegible] [illegible] माणिक्यं, [illegible] [illegible] मङ्गलं सत्सु, स [illegible] [illegible] [illegible] गन्तुं प्रतस्थे।

*

सोऽपि च माणिक्य [illegible] पृथ्वीराजस्य 'परमसुखमागच्छ-न्' निशम्य सन्तुष्टो नर्दमपि [illegible] सधीकं विधायोत्तमोपग-[illegible] [illegible] च भोजनं विधाय तदागमनं प्रति-पालयन्तस्थौ।

[illegible] तस्या भवनं प्रविश्य भुक्त्वा रुचिरं भोजनं [illegible]- [illegible] माणिक्याया कुचे यावद्ददाति तावत्पृथ्वीराजः स्वराज्य-[illegible] निभृतं रात्रौ दिल्लीनगरमागत्येच्छिनीकुमार्याः प्रासादं [illegible]। प्रविश्य च कुशलं पृच्छन् समीपवर्तिनि स्वकर्णा-[illegible] भवने [illegible] वीक्ष्य तत्कारणं जिज्ञासमान

कयमासप्रधानागमननिमित्तोऽयमुत्सव इति ज्ञातवान्. ज्ञात्वा चेत्थं कोपकलुषोऽपि विवेकावधृतमना. 'वेश्यैवेयं तत्र का वा स्वकीयता' इति जगाद. राज्ञी इच्छिनीकुमारी च स्वपतेः पृथ्वीराजस्येदं भाषणं निशम्य सरोषं—एष च कयमासः साम्प्रतं प्रमत्त इव लक्ष्यते. कथमन्यथा कर्णाटकीं स्वस्वामिगणिकां जानन्नपि तया सह रन्तु मनश्चक्रे. स चैवं कुर्वन्नप्युपेक्षितश्चेदस्मादृशा राजपत्नीरपि परामृशेत् इति बभाषे. तस्या इदं वचनमाकर्ण्य मूर्ध्नि वज्रेण निहत इव नष्टविवेकमतिः कोपातिरेकरक्तलोचनः स्वीयं धनुर्गृहीत्वा तीक्ष्णं बाणं तस्य कयमासप्रधानस्योरोऽभिलक्ष्यामुंचत्. स च बाणः कालसर्प इव महता जवेन गच्छन् पर्यंकावस्थितं विलासमग्नं कयमासं हृदये द्विधाऽकरोत्. तदानीमेव ज्ञातपृथ्वीराजागमनः पश्चात्तापदग्धः स कयमासामात्यः 'सदृशं मया कुकर्मणः फलं लब्धमिति वदंस्तस्मिन्नेव क्षणे धरणीतले पपात. कर्णाटकीवेश्याऽपि राजकोपभीता तस्यामेव रात्रौ दिल्लीनगरादपसृत्य कनोजनगरं गत्वा तदधिपस्य कन्यायाः संयोगितायाः दासी भूत्वा तस्थौ. पृथ्वीराजश्च लोककोपभीतस्तस्य कयमासस्य शवं स्वसेवकैर्निभृतं भूमिसात्कारयामास. स्वयं च पुनरपि मृगयार्थमरण्यं ययौ.

अथ प्रभातेऽपि न समागतं स्वपतिं प्रेक्ष्य चिंतातुराऽनिष्टमाशंकमाना साध्वी कयमासस्य पत्नी भगवतीसहायं चन्दकविं सर्वं वृत्तं न्यवेदयत्. स तु भगवतीप्रसादात् सकलं वृत्तांतं ज्ञात्वा शोकाकुलस्तां कयमासपत्नीं सत्यं वृत्तं निवेदयामास. निशम्य तच्छोकसागरमग्ना सा साध्वी स्वपतेर्गुणान् स्मारं स्मारं रुरोद. अन्ते सहगमनोन्मना स्वपते

ामत नन्दरति – आत ' यदि मयि स्थलोऽपि कृपालेश स्यात्तदा न शीघ्रमेव मम मम प्रियपतेर्मूर्धानं देहि. अथ च त गृहीत्वा चिता प्रविष्टा स्वर्गे पतिं लभेय इति साञ्जलिबन्ध प्रार्थयामास

चन्दकविरपि ता करुणामयी स्वपितृस्य कयमापस्य पत्न्या वाचा निशम्य दु खाकुल सत्वर वनाद्राजधानी प्रत्यागतस्य पृथ्वीराजस्याज्ञा गृहीत्वा तस्य कयमासस्य शिरस्तस्यै साध्व्यै ददौ तच्चादाय महताऽऽनन्देन सा सती वह्नि प्रविष्टा देवलोकमगात्. सर्वेऽपि नागरिका अकस्मादेव मुख्यामात्यस्य भयकर मृत्यु निशम्य भीता सयत्न तत्कारणज्ञानार्थं प्रयतमाना पृथ्वीराजमेव तत्कारण ज्ञात्वा क्रुद्धा परमनतुष्टा अभवन्. राजाऽपि स्वापराध घोर मन्यमानो नितान्तमखिद्यत. त च प्रधानघातेन खिद्यमान प्रेक्ष्य चिंतातुरा सर्वेऽपि सामन्तास्तदीयखेदापनयनाय मृगयामेवोचित सुलभमुपाय मन्यमाना मृगयार्थ राजान विज्ञापयामासु. सोऽपि च किमपि चित्तविनोदकारणमन्वेषयन्नायासप्राप्तमिदमन्वमन्यत.

(२)

अथ ते सर्वेऽपि सामन्ता महतानन्देन पृथ्वीराजसमेता मृगयार्थं महारण्य ययु. तत्र च नानाविधान् क्रूरान् पशून् हत्वा प्रकटितशौर्या कतिपयदिनानि तस्थु. ततश्च ते क्रमेण नानारण्यानि पर्यटन्त पानिपतरणक्षेत्रमाययु. तत्र परमपवित्रभागीरथ्यास्तीरे यत्र सनिवासा सानन्दास्तिष्ठन्तो विहरन्तस्ते सर्वेऽपि सामन्ताः पृथ्वीराज सन्तोषयामासु. तदानीं च दुर्गाकेदारो नाम विविधनानादेशसचार-

चतुरं कविवरं पृथ्वीराजस्य मतिविमागस्य स्वविद्यापरिचयं दर्शयितुं तथा सुप्रसिद्धेन भगवतीप्रसादशालिना चन्दकविना सह विवदितुं च मनीषां प्रदर्शयामास. पृथ्वीराजोऽपि विद्वज्जनादरपरः काव्यरसिकस्तदनुमुमुदे. अचिरादेव चन्दस्य तथा दुर्गाकेदारस्य साहित्यविद्याकौशलं मतिनैपुण्यं च वीक्ष्य सन्तुष्टस्तं दुर्गाकेदारमपारद्रव्यस्वामिनं विधाय स्ववासगमनाय विसर्जयामास.


स च दुर्गाकेदारो विद्वान्नानादेशान् पर्यटन् गिझनीश्वरस्य कीर्तिं निशम्य तं द्रष्टुकामो गिझनीनगरं जगाम. मार्गे च सोनपुरनगरस्य समीपे गिझनीश्वरः शहाबुद्दीनः स्वसेनया सह कृतनिवास आसीत्. तत्र च गत्वा गिझनीनाथमाशीर्वादैरभिनन्द्य सोहब्बतखाननाम्नो बलख्यस्य प्रधानामात्यस्य निवासेऽतिष्ठत्. अचिरादेव तत्र पिङ्गलजटाकलापधारी भस्मावलिप्तनिखिलगात्रो व्याघ्राम्बरः कश्चन तपस्विवेषधारी दूतः समायातः. स च तं सोहब्बतखानमवदत्-अमात्यश्रेष्ठ! साम्प्रतं भवद्भिर्निर्भयं दिल्लीपतिः पृथ्वीराज आक्रमणीयः. अस्मिन्नाक्रमणेऽवश्यमेव यूयं यशस्विनो भविष्यथ. यतो योऽस्य प्रसिद्धश्चामुण्डरायो भीम इव बलाढ्यः सामन्तो दिल्लीपतिर्बालकश्चास्ति स पृथ्वीराजेनैव शस्त्रग्रहणाय शपथं कारयित्वैव बंदीकृतः तथैव च बृहस्पतिरिव कुशाग्रमतिः प्रधानामात्यः कयमासो राज्ञा स्वयं निहतः. साम्प्रतं तु पानिपतग्रामसमीपेऽरण्ये मृगयार्थं गतः किमपि राज्यकार्यं न पश्यति दिल्लीपतिः तदस्मिन् समयेऽकस्मादागत्य ...कान्तोऽवश्यमेव पराजेष्यत इति

॥ श्री ॥



प्रथमो गुच्छः।

१ क्षत्रियवंशस्य प्राचीन इतिहासः।
२ पृथ्वीराजवंशवृत्तम्।
३ चाहुआणराठोडकुलयोर्वंशक्रमः।
४ पृथ्वीराजविजयः।




[illegible]

शहाबुद्दीनस्तु तस्य पृथ्वीराजस्येमां गर्वोक्तिं निशम्य मनसि नितांत कुपितोऽपि स्वस्थितिं विभाव्य शनैरवदत्-राजन्? प्रयत्नः पुरुषाधीनो नतु फलं. तत्तु दैवायत्तं. परन्तु फलं न लभ्यत इत्येतावता प्रयत्नादुपरमणं कापुरुषस्य लक्षणं. यदि मानवोऽनलस सततं प्रयत्नं कुर्यात्तदाऽवश्यमेव स फलं लभेतैवेति.

पृथ्वीराजश्च तस्योत्तरं मनोऽदत्वोच्चैर्जहास. पूर्ववच्च अष्टसहस्र-संख्याकानुत्तमानश्वानुपायनत्वेन तस्माद्गृहीत्वा तं मुमोच ततश्च महताऽऽनन्देन दिल्लीनगरमागत्य विजयोत्सवमकरोत्.





सप्तमो गुच्छः।


१ कनोजाधिपाकरणे विचारः

२ पञ्चनदे सत्कारः.

३ पृथ्वीराजशोधने जयचन्द्रस्य प्रयत्नो यश-
स्विता च.

४ समरसिंहस्य सैनापत्यम्.

[१]



वं प्रबल गिजनीपति शहाबुद्दीन विजित्य लब्ध स्थानि. पृथ्वीराजः परेषा दुर्दर्शनोऽभूत्. सर्वे च नृपा प्रतिस्पर्धिनस्तस्य सर्वत्र प्रसृतं यशो वीक्ष्य निजा. प्रतिकारासमर्था निवारिता इव तूष्णी-मतिष्ठन्.

एकदा पृथ्वीराजे [illegible]
मानमुपविष्टे सति कनोजनगरादागतः [illegible]
द्वारपालनिवेदितागमन [illegible] [illegible]
स्वामिन्! अहं खलु नानादेशान् पर्यटन् कनोजनगरमगच्छम् तत्र
च कुलस्थितिनिर्भूतं [illegible] राजा [illegible]
विघ्नविधानात् पर [illegible] स्वामिपादस्य पर[illegible]. परन्तु तस्यैक[illegible]
कन्या भूतलवासिनी देवाङ्गनेव मूर्तिमती रतिरिव [illegible] कृतिकौशल-
सर्वस्वमिव षोडशवर्षदेशीया शशाननेव मन्मथदेवस्य विजयन्तेव
कनोजनगरललामभूता वर्तते. सा तु सकलचारणमुखमण्डलवर्णितं
शारदज्योत्स्नाधवलां प्रतिभटहृदयकमलविदारिणीं स्वामिनां कीर्तिं
समाकर्ण्य हंसीव लुब्धा परमनुरक्ता स्वामिपादानेव वरिष्यामीति
कृतनिश्चया स्वामिद्वेषिणा तत्पित्रा जयचंदेन भूयोभूयो निवोधिताऽपि
स्वाग्रहं न मुंचति. तेन च कुपितस्तस्याः पिता कनोजाधिपो गङ्गा-
तीरे नूतनं प्रासादं निर्माय तत्र तां प्रतिबन्धे न्यधात्. तत्र च स्वानुज्ञां
विना कस्यापि प्रवेशं निषिषेध च. साम्प्रतं च सा सौन्दर्यखनिः केवलं
कतिपयदासीभिः समेता दुःसहं कारागारवासदुःखं भजत इति.

पृथ्वीराजस्तदाकर्ण्य क्रुद्धः स्वसहायमण्डलाय किंकर्तव्य-
मित्यपृच्छत्. अवदच्च–'नाहं खलु संयोगितानुरागाद्ब्रवीमि किंतु
क्षत्रियस्वीकृतव्रताभिमानात् न क्षत्रियाणां हीदं परमं व्रतं, यच्छर-
णागतानां परिपालनं. अनेन व्रतेनैवेह जगति क्षत्रियजातिः सर्वेषा-
मादरपात्रं संवृत्ता. तद्यदि मदनुरागापराधात् स्वकन्यां संयोगितां
राजा जयचंदः स्वद्रोहिणीं मन्यमानः प्रतिबन्धे स्थापयति तदा मया

[illegible] नन्दे [illegible]

[illegible] तथापि स [illegible] न [illegible] कर्तव्य सविचारमेव [illegible] राजसूयपदे विग [illegible] संयोगिताऽपि [illegible] तस्मात् [illegible] संयोगिता [illegible] नगरमानेया. [illegible] इति जगाद.

चन्दकविस्तु तूष्णीं स्थित्वा सर्वेषां भाषणानि शृण्वन्नुवाच— स्वामिन्! अस्मन्मतेऽपि युक्त्यैव सा पत्नीत्वेन [illegible]. सा च युक्तिरित्थम् — अहं च तस्मै जयचन्द्राय [illegible] दानमिषेण कनोजनगरं गच्छामि. अन्ये सर्वेऽपि सामन्तास्तथा पृथ्वीराजश्च मदीयाः परिचारका नाम भूत्वा [illegible] समं गच्छन्तु. वयं च सर्वे निभृतं तद्राज्यं प्रविश्य [illegible] उचितकाले योग्यमेव करिष्याम इति.

[illegible] पतिः पृथ्वीराजस्तथा सर्वेऽपि तदीयाः सामंताः चंदकवि- [illegible] इति निशम्य सन्तुष्टास्तथैव वर्तितुमनुकूला अभवन्.

अथ सुमुहूर्ते सर्वेऽपि पृथ्वीराजप्रभृतयः सामन्ताः चन्दकविराजस्य सेवका नाम भूत्वा दिल्लीनगरात् कनोजनगरं प्रति प्रतस्थिरे. चन्दकविश्चैकादशसहस्रपरिमिता सेनां जग्राह. मार्गे च बहून्यशुभचिह्नान्यभवंस्तथापि दृढनिश्चयः पृथ्वीराजः सर्वैर्जनैः समं कनोजनगरमाजगाम.

[२]

सर्वां सेनां तथा स्वसेवकान् बहिर्नगरात् स्थापयित्वा चन्दकविः सेवकद्वारा स्वागमनं कनोजाधिपाय निवेदयामास. सोऽपि तदागमनं निशम्यातिसन्तुष्टः परमादरेण तं राजसभागमनाय विज्ञापयामास. चन्दकविस्तु तदाह्वानमङ्गीकृत्य पृथ्वीराजं जलकुंभधारकसेवकमिषेण स्वेन समं सभामण्डपं निनाय.

जयचन्दोऽपि चन्दकविमागतं निशम्य प्रत्युद्गम्य सादरं सभामानीय उच्चैरासने समुपवेशयित्वा कुशलमपृच्छत्. चन्दकविरपि स्वकुशलं निवेद्य राजानमाशीर्वादेन—

॥ दुर्गा ते विदधातु मङ्गलमखिलं कन्नोजपृथ्वीपते ।
। निःशेषं परमां समाधिमयतां योगेश्वरस्त्वत्कृतः ॥
॥ [illegible] शास्त्रि यत्र नैर्महिभुजः संसेव्यमानोऽधुना ।
। [illegible] मुहुः सततं शूरैः परं प्राणितः ॥ १ ॥

[illegible] कुशलप्रश्नः -

यानि च निर्मितानि महिभुजः सर्वेऽपि प्राप्ता अमी ।
तेन त्वं [illegible] सुनृपते ! नक्षत्रमालाश्रितः ॥

[illegible] ॥२॥

[illegible]

[illegible] नितान्तं [illegible] घोष्मदद् [illegible] दृष्टिपु [illegible] निदाघ [illegible] भगवानोऽपि [illegible] इति.

[illegible] पदं सति दाक्षिणीकृता- [illegible] समागतानस्मान् यदि प्रत्युत्थाय [illegible] न दोषः प्रत्युत गुण एव. एतादृशं [illegible] पतन्तीत्यर्थे मन्त्र इति सहासं [illegible]

[illegible] तथोदितमाकर्ण्य च [illegible] तं कविराजमादरातिशयेन सिषेवे. अथ [illegible] एतेषु मित्रेषु सत्सु पृथ्वी- [illegible] मम तातपादानां पृथ्वीराजजनकस्यानंग- पालस्य च महान् स्नेह आसीदिति सर्वेऽपि जना जानन्ति, यदाऽ- [illegible] स्वकन्यां प्रादात्तदाऽस्माभिरेव धनसाहाय्यं कृतं. [illegible] तेनानंगपालेन पृथ्वीराजो दिल्लीपतिः कृतस्तदाऽपि अस्माभि-

विरोधो न कृतः. एवं स्थिते पृथ्वीराजेन मदारब्धो राजसूययज्ञो विध्वंसितः, सर्वे च समागता भूपालाः समं मया वृथा कोपिताः. मम बंधुर्वलुकरायश्च समरे निहत इति किं समीचीनं कृतं! इत्यपृच्छत्.

चन्दकविश्च जयचन्दस्येमं प्रश्नं निशम्य— राजन्! कनोजपते! यथा त्वं मन्यसे 'पृथ्वीराजो मह्यं द्रुह्यति' इति तन्न समीचीनं. यथा तव पितामहोऽनंगपालः कनोजाधिपेन समं स्नेहेनावर्तत तथैव पृथ्वीराजोऽपि वर्तते. कथमन्यथा त्वयि दक्षिणां दिशं विजेतुं गते सति पश्चात् त्वद्राज्याक्रमणाय समागतं गिझनीपतिं शहाबुद्दीनं पराजित्य पृथ्वीराजस्तव राज्यं रक्षितवान्. राजसूययागस्तु कलियुगे शास्त्रनिषिद्धतयाऽधर्मप्रवृत्तिनिरोधाय विध्वंसितो न त्वसूयया. यदि त्वादृशो राजाऽधर्माचरणं कुर्यात्तदा सर्वेऽपि त्वदीया वा परकीया वा प्रजाजना अधर्ममेवाचरेयुः. राजन्! यदि कश्चिद्धनाढ्यो वणिगपि राजसूययज्ञं कुर्यात्तदा तत्किं न्याय्यं भवेत्? तस्मात्त्वमपि 'पृथ्वीराजेन ममायं यागः प्रतिबद्ध इति दुराग्रहंस्त्यक्त्वा द्वेषं च मानसिकं विहाय पूर्ववत्स्नेहेन वर्तस्व. युष्मासु क्षत्रियराजसु परस्परं स्नेहेन वर्तमानेषु सत्सु कः खलु मन्दधीर्भारतं जेतुं शक्नुयात्. महंम्मदीयधर्मानुसारी शहाबुद्दीनः अपि परस्परद्वेषपरान्वः प्रेक्ष्य भारतमाक्रन्तुमिच्छति. भगवती चण्डी युष्मान् सर्वानपि प्रेम्णा वर्तमानान् चिरंजीविनो विदधातु इति साशीर्वचनमगादीत्.

जयचन्दस्तु चन्दकवेरिदं भाषणं सत्यं मन्वानोऽपि गर्विष्ठ उच्चैर्जगाद—अस्मिन् समवेते राजमण्डले पृथ्वीराजसमः कोऽप्यस्ति

[illegible] पृथ्वी[illegible]

(३)

[illegible] तस्य स्वामिभक्तस्य चन्दकवेरिव [illegible] तस्य [illegible] सेवकस्य च [illegible] सेवकमेव पृथ्वीराजममन्यत. अक- [illegible] समागत इदानीमेव बन्दी कर्तव्य इति. [illegible] विलोक्य चन्दकविर्मनसि नितान्त [illegible] राजा च यदि मदाश्रय सेवकः पृथ्वी राज इति [illegible] सेवकः स यदा सर्वेऽपि जना मां [illegible]. [illegible] जयचन्द्राय प्रबलः पृथ्वीराजो यत्र कुत्रापि [illegible] इति. तदस्मयं सेवकः पृथ्वीराजो नवेति निर्णयमिति [illegible] विचारयन् पृथ्वीराजविज्ञानविषये युक्तिमलभत सा चेयम्.

अयं राजकन्यायाः दासी कर्णाटकी नामास्ति, या च पूर्वं पृथ्वी-राजस्यापि दासी. तस्या अयं नियमः—सा च सर्वस्मिन् जग-[illegible] पृथ्वीराजमेव पुरुषं मन्वाना तं दृष्ट्वैव स्वमुखं पटेनावृणोति नान्यथा. तस्मात् सभामाहूता सा दासी स्वमुखमावृणुयात्तदा अयं पृथ्वीराज इति ज्ञातव्योऽन्यथा साधारणः कश्चन सेवक इति.

विचार्य चैवं संजातानदः सत्वरं सेवकमाहूय कर्णाटकीं दासीं समानाह्वयत्. सा च राजाज्ञामनुसृत्य सभामागता दूरत एव पृथ्वीराजं प्रत्यभिज्ञाय लज्जया मुखं प्रावृणोत्. तां मुखावरणोद्यतां वीक्ष्य कविश्चन्दो नेत्रसंकेतेन तां—वयमिह कपटेन समागताः, यदि त्वं पृथ्वीराजोऽयमिति मुखप्रावरणेन दर्शयिष्यसि तदा वयं सर्वे बन्दिनो भविष्यामः. किंच—राजा जयचन्दः प्रथमत आरभ्य पृथ्वीराजं द्वेष्टि तदधुनाऽनायासेन स्वहस्तगतं तमवश्यमेव स प्राणैर्वियुंज्याद्यदा स्वामिघातपातकमपि लप्स्यसे. तत्कयमापीमिव सम्राजं पृथ्वीराजं स्वकर्मणा मा मारयेति सूचयामास.

सा प्रकृत्यैव स्त्री तत्रापि गणिका सहसैव तस्य चन्दस्य मनोगतं जानन्ती तस्मिन्नेव क्षणे मुखावरणं दूरीचकार.. तां च स्वीकृतदूरीकृतमुखावरणां वीक्ष्य जयचंदो विस्मितोऽजातनिश्चयो जिज्ञासया तामेवापृच्छत्—गणिके ! त्वं हि प्रथमं स्वमुखं किमिति प्रावृणोः पश्चाच्चोद्घाटयः? तत्सर्वं सत्यं कथयेति. दासी तु परमचतुरा राजानं माञ्जलिविनयमवदत्. स्वामिन् ! अस्यां सभायां कविवरश्चन्दः समायातः स च पृथ्वीराज इव मम मान्यः. तत्तस्य सन्मानार्थं प्रथमं मया मुखमावृतं पश्चात्कारणाभावादेव तदुद्घाटयमिति. तदेतत् कर्णाटक्या वचनं निशम्य चन्दकविः परं सन्तुष्टस्तामाशीर्वचनैः समतोषयत्. सेवकवेषधारी पृथ्वीराजश्च स्वकपटाचरणप्राकट्यभीतः कण्ठगतप्राणस्तत्प्रतिवचनं निशम्य स्वजीवितं प्रत्यागतं मेने. जयचन्दस्तु तस्य सेवकस्य तेजो विलोक्य भ्रान्तचित्तः कर्णाटकीवचनं न सत्यमिति मन्यमानोऽपि प्रकटं तथा वक्तुमनीश्वरस्तूष्णीं तस्थौ.

सूर्यवंशे राजा रामचन्द्र प्रादुर्बभूव. अस्तु. तस्येक्ष्वाकोर्भगिनी 'इला' चन्द्रपुत्राय बुधराजाय प्रदत्ता. ततएव च प्रसिद्धश्चन्द्रवंशः प्रससार. तस्य बुधस्य पुत्रो ययातिर्नाम बलाढ्यो नरपतिर्बभूव. तस्य 'उरु' 'पुरु' 'यदु' नामानस्त्रय पुत्रा आसन. तत्र पुरोर्वंशे समुत्पन्नो हस्ती नाम नरेश सुप्रसिद्ध हस्तिनापुर वासयामास. हस्तिराजमारभ्य द्वाविंश पुरुष प्रसिद्धोऽजातशत्रु-र्युधिष्ठिरोऽभूत्. स च सुप्रसिद्धेऽनेकनरवीरसमलङ्कृते कुरुक्षेत्रसंग्रामे विजय लब्ध्वा प्रसिद्धमिन्द्रप्रस्थदुर्ग व्यरचयत्. एवं यदोर्वंशेऽपि भगवान् कृष्णस्तथा बलरामश्च समभवताम्. तौ च स्वीया राजधानी गुर्जरदेशे वर्तमानं द्वारकाक्षेत्रमकुरुताम्. साम्प्रतम् जेसल-मीरावीपास्तथा कच्छप्रान्ताधिपा आत्मानं कृष्णवंशजान् भावयन्ति. जयपूरजोधपूरोदयपुराधिपाश्च सूर्यवंशसभवानात्मान निवेदयन्ति. अस्तु.

सुप्रसिद्धे युधिष्ठिरवंशे लब्धजन्मानस्त्रिंशा नृपाः स्वपैतृकं सिंहा-सन प्राप्य धर्मेणावर्तन्त. एतेषु चरम क्षेमराज. स्वकर्तव्यपराङ्मुखो विहारी स्त्रैण सकलदोषभाजन बभूव. राजान च कुमार्गगामिन विलोक्य तत्सेवका अपि तथैवावर्तन्त. तेन सर्वेऽपि प्रजाजना असन्तुष्टा राजशासनमत्यक्रामन्. प्रजासु राजशासनमतिक्राम्यन्तीषु सतीषु प्रतिदिन नानाविधा आपद समापतन्.

ईदृशीमव्यवस्था वीक्ष्य तस्य क्षेमराजस्य प्रधानामात्यो विसर्वो नाम स्वामिन हत्वा हस्तिनापुराधिपत्यमात्मसादकरोत्. यद्यपि स्वामिवधेन लब्धराज्य सोऽमात्य प्रजाना नातिप्रियोऽभूत्तथापि कुमार्गगामिन

अथ जयचन्दस्तं चन्दकविं कलसनिवासे विश्रान्त्यर्थं व्यसर्जयत्. तस्य सेवार्थं भोजताधिप रावणं नियोजयित्वा तं निभृतं 'चन्दकविनिवासः शङ्कितैर्निरीक्षणीयः, अज्ञातस्य कस्याऽपि पुरुषस्य प्रवेशस्तस्मिन्निषेधनीय इत्यशात् सोऽपि चाक्षरशः इमां स्वामिन आज्ञां पालयामास.

ततश्च सावधानेनावस्थितं चन्दकविं राजा जयचन्दो बहुमूल्यैरुपहारैः परं सत्कारयामास. चन्दकविरपि राजरीतिमनुजानन्नुपहारहारकान् सेवकान् समतोषयत् तथा दर्शनार्थमागतं मुख्यामात्यं सुमतिं तथा राजपुरोहितं श्रीकण्ठं सन्मानेनापश्यत. निर्गतेषु जयचन्दराजसेवकेषु लावण्यवतीनां, षोडशवर्षीयाणां, हस्तयुगलधृतकनकपात्रविराजमानोपहाराणां, अप्सरसामिव समानवयस्कानां, दासीनां दलं चन्दकविनिवासस्य पुरत आजगाम. तद्वीक्ष्य सर्वे निरीक्षणार्थं नियुक्ताः सैनिका हृतचित्ता चित्राणीव स्तब्धं तस्थुः. मुख्येन सेनाधिकारिणा पृष्टा तदग्रेसरा दासी जगाद—वयं हि सर्वा दास्यो राजकन्यायाः संयोगितायाः. तदाज्ञयैव कवीश्वरं चन्दं द्रष्टुं वयमागता इति. द्वारपालेन च निवेदितागमना अनुमितिं लब्ध्वा प्रवेशिताः सादरं सर्वानप्युपहारांस्तस्मै कविराजाय समर्पयामासुः. चन्दस्तु सस्मितं तानुपहारान् स्वीकृत्य ताभ्यः समीचीनं पारितोषिकं वितीर्य 'अचिरादेव भगवानेकलिङ्गेश्वरो राजकन्याया अभिलषितं पूरयिष्यति' इति साभिप्रायमाशीर्वचनं प्रेषयत्. ता अपि सानंदास्तदाशीर्वचनं स्वस्वामिन्यै निवेदयामासुः.

[illegible]

[illegible] सेनानिवेशा प्रतिरोध
[illegible] परिवाहिन स्थानि
[illegible] तदानींतवा
[illegible] जय-
[illegible] इत्यसि
[illegible] वितरत सजयरायस्य पु॰।
[illegible] पितु कीर्तिमिति. सोऽपि
[illegible] सैन्यमात्रकाम
[illegible] महाप्रतापिन [illegible]राय
[illegible] पलायनपरा अम-
[illegible] जयचन्द्रस्य साहाय्यं
[illegible] सैन्यं प्रेषयत् सोऽपि समागत्य
[illegible]

न्वेषेण युद्ध्यमानस्तान् भीतिविव्हलान् पलायनोत्सुकान् न प्रतिरो-
द्धुमशकत.

कनोजाधिप कनोजदुर्गमारुह्येद युद्ध पश्यन् महाप्रताप [illegible]
पृथ्वीराजसेनापतेर्लगडारायस्य शौर्यं वीक्ष्य भीतः कथमपि स
[illegible] निचार्य [illegible]दुर्गे वर्तमाना भयकरध्वनि किलकिला-
नाम्नी [illegible] तद्गोलकस्य लङ्गमकरोत् तस्मिन्नेव [illegible]
स [illegible] लगडीरायस्तस्य लोहगोलकस्य लङ्गता प्राणरत्नी-
[illegible].

[illegible] सेनापति समरभूमिपतित प्रेक्ष्य [illegible]
[illegible] भात्यनुसारेण. [illegible] युद्ध [illegible]
[illegible] पुनरपि युद्धं [illegible] अस्मिन् संग्रामे [illegible]
[illegible]. [illegible] स पृथ्वीराजस्य [illegible]
[illegible]. [illegible] सैनिका अपि [illegible]
[illegible] पृथ्वीराजस्य [illegible]
[illegible] कथमपि काल [illegible]-



अष्टमो गुच्छः ।

१ पृथ्वीराजस्य संयोगितायाश्च परस्परं दर्शनम्
२ तस्या अन्तपुरे प्रवेशः.
३ गान्धर्वविवाहः.
४ संयोगिताया दिल्लीगमने संमतिः.

(१)



थ्वीराजश्च म्यनिवेशस्थान [illegible] कानेणेतस्तत पर्यटन् मृगव [illegible] कनोजनगरस्य नातिदूरे [illegible] चुम्बिमहावृक्षावलीव्याप्ते [illegible] नृसिंहनाद नीतगजयूथचीत्कारव्याकुले, [illegible] लतागृहमनोहरे, महावने कृतप्रवेश, [illegible] नम्वशौर्यचिन्ह प्रभूतानि [illegible] नाहारिराजगाम. तदानी [illegible]

सारवर्षमिव, हिमानीसंपातमिव, सुधाऽऽसारमिव, पतन्त निपतित स्थाने स्थाने समीरणप्रचलितवृक्षच्छायाश्यामलां अभिमनोहरां पतन्त चन्द्रज्योत्स्नां निरीक्ष्य; निलीनपक्षिगणा ज्योत्स्नाधवलशुभ्रा लतातता विकचकुसुमस्तबकालंकृता, निद्रितां तरुणीमिव पृथ्वीमालोक्य; अतिमृदुलशाखाबाहुवलयाश्लिष्टवृक्षकान्तं, प्रफुल्लकुसुमगुच्छालंकार-समलंकृतं, मन्दवाहिना दक्षिणानलेन चलितं कामाकुलमिव लतात-रुणीगणं समीक्ष्य; मन्दमारुतसंपर्कसंजाततरंगेषु महातडागेषु क्रीडार्थं विकसितकमलकोरकपतितपरागधूसरं, बिसच्छेदनासक्तं हंसमिथुन-जातमवेक्ष्य; रात्रिंदिवं भक्तगणोद्धारतत्पराया भागीरथ्याः मूर्तिमत्या कीर्तेरिव भागीरथ्याः प्रवाहध्वनिं निशम्य सानन्दचेता अश्वादवतीर्य पद्भ्यामेव शनैः शनैश्चरन् गंगातीरमागच्छत्. तत्र च विशुद्धचंद्रिका-तादात्म्यं प्राप्तं अतिचपलधावमानमत्स्यगणसंपादितभेदं, गोधूमचणका-कादिसस्यभारविनम्रैर्हरितैः क्षेत्रैरलंकृताभ्यां पिपतिषुकूलमृत्तिकापात-भयंकराभ्यां तीराभ्यामलंकृतं, अन्तःपतितचंद्रप्रतिबिम्बच्छलेनासस्य-देवाङ्गनामुखकमलशोभमानं गंगाप्रवाहं प्रेक्ष्य प्रसन्नः अश्वपनयनाय अश्वं जलं पाययित्वा स्वयमपि पर्याप्तं मधुरं शीतं च गंगाजलं पपौ.

अथ प्रतितीरवर्तिनं, सुरम्यशुभ्रपाषाणमयं, चन्द्रिकानिर्मितमि-व गगनांगणविहरच्छिखरं, कनककलशमण्डितं, सुव्यवस्थितरचनम् अनेकवातायनविराजमानोशीरजवनिकामधुरं, प्रदीपप्रकाशप्रदीप्तं अनन्तशस्त्रिकगणरक्षितं, विस्रब्धपरिसुप्तदासीगणसंकुलं प्रासादराजं दृष्टिविषयमकरोत्. तं समीक्ष्य संजातकुतूहलः पृथ्वीराजः परमा-

निरूप्यमाणस्तास्मिन्—सकलत्रिलोकीलावण्यव्ययेन निर्मितं

[illegible] मदनबाणरक्षणमिव, [illegible], लोलभु-
[illegible]. स च [illegible] प्रदेशोऽप्यस्मात्कलिकणपरिक्षित प्रसादे
[illegible] पीतम् [illegible] सविशेषानपश्यत्.

तत्र च [illegible] मध्ये मरकतमणिनामुरगनुवर्णयदेके दा-
[illegible]. [illegible] दितमुखकमला, [illegible]
[illegible] कमलिनीमिव, सर्वत [illegible] तीर्णभानुरक्तकपोल
युगला [illegible], उपधानीकृतहस्ताप्रकनिष्ठ
[illegible], प्रतिमुद्रानिलतन्तु-
[illegible] कम्पमानकुचकुड्मलहृदयप्र-
[illegible], रम्यरुचिरोल्लसा मुग्धा हंस-
[illegible] निर्मलकलना विप्रष्ट मुक्ता भीषणभुजंगमपरि
वेष्टिता चन्दनलतामिव [illegible] ता सुन्दरी मद्राक्षीत्.

तेनाऽपि [illegible] ; कोऽयं लोगण ! किमर्थमत्र
वसति ! [illegible] वा प्रतिकूलोऽपीति ज्ञातुं [illegible]
[illegible]. आगत्य च तस्य सं [illegible] पुरतः किमपि
[illegible].

तस्मिन्नेव समये साऽपि तरुणी किमपि स्वमनोरथानुकूल
[illegible] पश्यन्ती सतुष्टा जागर्तिस्म. प्रतिबुद्धा च सा तं स्वप्नं स्वप्रिय-
[illegible] निवेदयितुकामा तानपि त्वरया समबोधयत्. प्रबुद्धा ता
[illegible] स्वप्नं निवेद्य [illegible] पुरप्रदीपनाऽऽकाशतः पद्मरागान् परिजि-
[illegible] तया सह [illegible] वातायनमागत्यातिष्ठत्.

तदानीमेव— गंगाशोभादर्शनासक्तं, अतिचपलवाजिराजसमीपस्थं, अतिगौरपादतलाभ्यां धृतोपानहं, सुवर्णशृङ्खलासनाथसव्यपादं, परमप्रियया शत्रुकण्ठनालच्छेदनदक्षया हीरकांकितसुवर्णकोशस्थितयाऽसिलतया समलंकृतकृशमध्यं सव्यहस्तविराजमानबृहच्चापं, कपाटविशालोरस्कं, मौक्तिकहारसमलंकृतग्रीवं, इषुधिनिषंगनासलितस्कन्धं, सुप्रसन्नवदनकमलं, सुदीर्घराजतेजःशालिनयनयुगलहृद्यं, अखण्डसुदीर्घशिरोरुहभासुरं, सुवर्णललाटपट्टसुदरं मन्मथमिव स्वशत्रुं शंकरं प्रसादयितुं भागीरथीं शरणागतं, कनोजाधिपैश्वर्यदिदृक्षया स्वर्गादागतमिंद्रमिव, तं तरुणं पृथ्वीराजं निर्निमेषं पश्यन्ती मुहूर्तं निश्चलमतिष्ठद्राजकन्या संयोगिता. पृथ्वीराजं च गंगाया विहरतां मत्स्यानां लीलादर्शने बद्धमनसं वीक्ष्य स्वागमनं ज्ञापयितुकामा नूपुरध्वनिमकरोत्.

पृथ्वीराजश्च सहसैव श्रवणमनोहरेण नूपुरध्वनिना समाकृष्टमानसः सरभसं मुखमुन्नमय्य—विगलितघनीभूतां ज्योत्स्नामिव, घनावस्थायिनीं सौदामिनीमिव विविक्तदेशवासिनीं, कमलामिव, तपस्यन्तीं देवांगनामिव, शंतनुवियोगोद्विग्नां गंगामिव, शीतलसुरसरिन्मरुत्संगकम्पमानमृदुलमूर्धजां, मस्तकस्थापितकुसुममालागंधलोभसमागतभ्रमरकुलनीलरत्नशिरोभूषणां, मौक्तिकभूषणभूषितमनोहरकर्णपाशां, लावण्यसर्वस्वसौभाग्यतिलकदर्शनीयभालप्रदेशां, यमुनानदीतरंगानिव सर्वतो नयनकमलाभ्यां विभ्रमैर्दृष्टिक्षेपैरुत्पादयन्तीं, स्पष्टतरप्रतिबिंबितगंगाप्रवाहनटद्भ्रमणादितविशेषकृत्यरमणीयकपोलां, अधरीकृतबिंबाधरां, कम्बुकण्ठीं, अतिनिर्मले लावण्यस्रोतसी इव विगलित-

बाहुभुजलतिका, मदनदुर्जयदुर्गाभ्यामिव, तारुण्यागमचिह्नाभ्यामि-
वातिनिबिडाभ्यां कुचाभ्यां हृदयहारिणी, सूक्ष्मतरवसनपरिधानेन
परिदृश्यमानसुन्दरनाभीसमलङ्कृतत्रिवलीमण्डितोदरलतिका, अति-
पीवरोरुयुगा, सुन्दरमञ्जीरनादगर्भवरगुल्फयुगलभासुरपदयुगला,
विलसत्सर्वाङ्गाभरणा, तत्प्रतिबिम्बरूपया सख्या सहिता, काचन तरुणी
वीक्ष्य पृथ्वीराजं निर्निमेषनयना चिरमतिष्ठत्.

पृथ्वीराजश्च तरुणीं मनस्येव व्यचिन्तयत्—कथमिमां दृष्टवतो
मे धैर्यमपि विलुप्तम्? मनश्च पुनरपि न प्रत्यागच्छति. अहं तु
सदा नैव वर्तमानं तत्स्वरूपमवेक्ष्याविचार्य चानुरक्तः ! इति.
सापि राजकन्या पृथ्वीराजं निरीक्ष्य तत्समावस्थाऽभवत्.

(२)

चतुरा दासी च स्वप्रियसख्याः संयोगितायास्तादृशीमवस्थां
वीक्ष्य सत्वरं झटिति सोपानादवतीर्य गङ्गातीरमगात्. गत्वा च
विनयेन तन्मुखसक्तदृष्टिं तन्मुखचन्द्रज्योत्स्नापाननिरतनयनचकोरं
पृथ्वीराजं जगाद. भो मदनसुन्दर ! सकलभूपालचूडामणे ! यां
राजकन्यां त्वं पश्यसि सैव त्वां स्वकोमलचरणनिक्षेपेण स्वप्रासादं
सनाथीकर्तुं प्रार्थयते, नात्र किमप्यत्याहितं इयं हि सकलसामन्तनाय-
कस्य कनोजाधिपस्य कन्या संयोगिता नाम. सा च तव सर्वत्र प्रसृतां
सकलगुणनिधेः कीर्तिं निशम्यानुरक्ता त्वदागमनार्थं परमात्मानं
प्रार्थयन्ती वराकयद्य तेनानुगृहीता. सा च जानात्येव स्वामी कर्णाटकी
नाम गणिका. अहं च कुतश्चित् कारणाद्दिल्लीनगरं विहायात्रागता

त्वय्यनुरक्ता तत एव त्वद्द्वेषिणा तत्पित्राऽत्रैकान्ते प्रतिबन्धे स्थापितामिमां राजकन्यां संयोगितां विदित्वा युष्मत्सेवाविधानेच्छयाऽहमत्र दासी अभवम्. साऽपि सर्वगुणाकरेति, कल्याणी मां सखीं मन्यते न दासीं. एतादृशी गुणखनिः पृथ्वीपतिकन्या युष्मभ्यमेव योग्या नान्यस्मै. यथा हि कृष्णाय रुक्मिणी, तथैव भवतेऽपीयं. इयं च सततं त्वद्गुणगणश्रवणधृतजीविता स्वपितरमपि न बहु मन्यते. पित्रा जयचन्द्रेन त्वत्तो मनो निवर्तयितुं चिरं प्रायति, परन्तु स्वल्पं यशो न लब्धं प्रत्युत स यथा यथा नानाविधैरुपायैस्तथा कर्तुं प्रायतत तथातथाऽस्या मनस्त्वयि परमासक्तमभवत्. सांप्रतं तु त्वद्वियोगदुःखाकुला सम्प्रवृत्तं वसन्तं वीक्ष्य परं दुःखायते. कदाचित् मन्दं शीतलं च दक्षिणानिलं स्पृशन्ती सद्य एव मूर्च्छति. कदाचिदिमं प्रफुल्लं सहकारं मदनशरेषुधिं भावयन्ती वातायनानि पिधाय तूष्णीमेकाकिनी विलपति. कदाचित् कुसुमितमाधवीलतामण्डपं वन्हिमयमिव मन्यमाना गन्तुं नोत्सहते. कदाचित्—चूताङ्कुरपरिपूर्णेषु सहकारेषु स्थितस्य कोकिलस्य मनोरमानालापान् श्रवणदाहकान् मन्यमाना स्वकर्णावेव पिधत्ते. किंबहुना चन्दनगन्धवाहिनं शीतलाद्दक्षिणानिलाद्दिल्लीतः समागतमत्युष्णमपि वातं संभावितत्वदङ्गस्पर्शं बहु मन्यते. मां च प्रत्यक्षीकृतपृथ्वीराजां देवतां मन्यते. साम्प्रतं तु त्वत्प्रतिमां रात्रिंदिवं ध्यायन्ती सततनिपतदश्रुसमाकुलनेत्रा जाग्रती कालं यापयति. पितृकोपभिया मनोगतं स्पष्टं वक्तुमशक्नुवाना पुटपाकावस्थां बिभर्ति. तद्यदि पृथ्वीराज ! तस्यामनुरागो वा, अनुकम्पा वा, वात्सल्यं वा, प्रेम वा लेशतोऽप्यवशिष्टं स्यात्तदाऽविचारं त्वयाऽगत्योज्जीवनीया मेति प्रार्थयामीति.